UNIVERSITY OF TORONTO
3 1761 00997591 3

Digitized by the Internet Archive
in 2018 with funding from
University of Toronto

https://archive.org/details/anthologiasanscr00lass_0

# NTHOLOGIA SANSCRITICA

## GLOSSARIO INSTRUCTA.

IN USUM SCHOLARUM

EDIDIT

CHRISTIANUS LASSEN,

PHIL. DR. PROFESSOR BONNENSIS P. E.
SOCIETATT. ASIATT. BENGAL. BRITANN. PARIS. ET REG. SCIENTT. NORVAG.
SOCIUS HONOR.

BONNAE AD RHENUM,
IMPENSIS H. B. KOENIG.
MDCCCXXXVIII.

LIBRARY
AUG 30 1971
UNIVERSITY OF TORONTO

PK
3595
L38
1838a

# PRAEFATIO.

Haud semel mihi in scholis de lingua Sanscritica habitis accidit, ut, quum praecipuis grammatices capitibus iam explicatis et interpretatione locorum aliquot faciliorum illustratis iuvenes studiosos enarratione libri cuiusdam ab ipsis suscipienda acrius exercitare vellem, in eligendo tali libro Sanscritico dubius haererem. Etenim quum sine lexici auxilio tirones proprio marte interpretandi munus ne tentare quidem possint, et quod solum adhuc prodiit lexicon Indicae linguae maius atque ad varia scriptorum genera accommodatum, neque ab omnibus comparari possit, nec, si posset, usurpari, quippe quod Anglica tantum vocabulorum explicatione instructum sit, nil aliud relinquebatur, nisi ut ad eos libros confugeremus, quibus interpretandis sufficiat glossarium Sanscriticum Berolini editum. Qui

libri perutiliter quidem lectitantur, id tamen habent incommodi, quod omnes ad idem dicendi genus, epicum dico, pertineant, ita ut unam tantum linguae speciem exhibeant, atque primis difficultatibus superatis non magnopere ingenium discentium acuant.

Plurimum autem referre censeo, ut iuventus Indicarum litterarum studiosa in scholis ita instruatur, ut posthac sine magistri auxilio variis librorum generibus cum fructu uti possit. Librorum autem ipsorum lectione quantum opus sit vel iis, qui Indicis litteris eo solummodo consilio operam navant, ut interiorem sibi cognatarum linguarum, Graecae, Latinae, Germanicae, aliarum cognitionem compararent, exemplis facile possem demonstrare, si operae pretium esset docere, quod neminem talium rerum peritum infitias iturum esse confido, veram linguae alicuius cognitionem non formis grammaticis ediscendis et copia quadam verborum paranda contineri.

Difficultati, quam supra indicavi, mederi optime quidem posset editio lexici Sanscritici copiosioris, quo continerentur vocabula omnium aut maioris certe partis librorum Sanscriticorum, qui typis iam sunt descripti.

Tale autem opus ut nostratium quisquam susccepturus sit aut mox aut tempore haud ita longinquo quum sperare vix liceret, rem minime supervacaneam acturus mihi videbar, si locorum, quos legere possint aut linguae Indicae minus periti aut amplioribus subsidiis destituti, copiam quadam ex parte augerem.

Explicui, lectores benevoli, consilium, quod sequutus sum in hoc libro edendo, quem si Anthologiam inscripsi, id factum est ob inopiam tituli accomodatioris; nam Anthologiam Sanscriticam iustam, omnia dicendi genera complectentem idoneisque speciminibus illustrantem, condere nec volebam, nec, si voluissem, potuissem, a bibliothecarum Indicarum divitiis seclusus.

Triplex autem libri, quem edere parabam, ratio servanda erat. Primum praebere debebat specimina non unius tantum alicuius generis, deinde modico pretio prostare, denique glossario instructus esse. Quumque praeterea destinatus esset usui eorum, qui grammatices elementa iam tenent, ut vires suas propria exercitatione augerent, abesse oportebat tum interpretationem Latinam, tum explicationem locorum, qui sola grammatices cognitione et glossarii ope enodari possent; difficiliora contra aut

quae manum flagitarent emendatricem, silentio praetermitti non oportebat.

Explicata ita totius libri ratione, iam proponam quae de singulis dicenda habeam.

Primo loco posui fabulas Milesias, quibus nullum compositionis Sanscriticae genus simplicius est; imo iusto quodammodo est simplicius, quandoquidem sermo contagione loquelae vulgaris haud omnino immunis remansit. Sciendum est enim, talium fabularum libros, quippe qui cura hominum doctiorum parum digni iudicentur, prorsus fatis suis relinqui, aut qui fato crudeliores sunt, hominibus doctae linguae non solum imperitis, verum etiam vulgari qua ipsi utuntur, eam contaminantibus. Quo fit, ut foedissimis erroribus scateant exemplaria et mirum quantum discrepent. Quod quidem immerito accidit narratiunculis istis, quae, si excipiuntur quae pro nostris moribus iusto sunt lasciviores, multo magis delectant, quam calamistra recentiorum poetarum, qui praeter artificiosa quaedam vocabulorum miracula nil proferre possunt, dum fabulatores isti vulgares, ipsarum historiolarum illecebris freti, ornatum sermonis prorsus negligunt.

Plures exstant Sanscriticae fabularum Milesiarum collectiones, de quibus huius loci non est dispu-

tare, praesertim quum accurate factum id nuper sit a Viro doctissimo et clarissimo, Loiseleur Deslongchamps in duabus scriptionibus Francogallice scriptis, ad quas ablegare licet eos, qui plura de iis edoceri cupiunt. *) Notae quidem iam dudum fuere ex versionibus quum in linguas Indicas hodiernas, tum in externas factis; Sanscritice editae sunt nullae praeter prima capita duarum, quae publici iuris ego feci.

Prior collectio inscripta est Vêtâlapank'avinçatî et tribuitur poetae cuidam Çivadâsae. **) Potest id quidem verum esse, certum est minime. Non enim ab uno homine inventae sunt istae narratiunculae et qui fertur Çivadâsas, si vere unquam exstitit, vix aliud egit, quam fabulas multo iam ante ipsius aevum in popularium suorum ore viventes collegit et certo quodam ordine disposuit. Iam si reputaveris, poetae istius nomen, quod significat cultorem dei Çivae, facile fingi potuisse ex eo, quod superstitionibus religionis Çivaicae superstructum sit argumentum fabularum praecipuum, multo proba-

*) Essai historique sur les contes orientaux. Paris 1838. p. 46. et Essai sur les fables Indiennes etc. Ibid. 1838.

**) Vid. Colebrookii dissert. on Sanscrit and Pracrit poetry, in Ass. Ress. X. p. 411. ed. 8.

bilius videbitur, effictum esse cum nomine ipsum poetam. Quantopere autem Çivam veneratus sit quicunque editionem novissimam collectionis nostrae curaverit, arguit locus p. 36, l. 1. ubi indicium esse dicitur aetatis ferreae, quod canones doctrinae teneant sectatores Vis'n'uis.

Omnino, dicam enim, quod sentio, vanus esset, si quis indagare velit, a quo primum conditae fuerint fabularum talium collectiones, praesertim in tanta historiae Indicarum litterarum incertitudine. Accedit, ut, etiamsi innotuerit qui certo quodam tempore corpusculum tale ediderit, ex ea cognitione minime consequatur, eius editionem ad nostram aetatem pervenisse; mutat enim pro arbitrio suo in talium librorum contextu librarius quisque quaecunque sibi non placeant. Quod ipsum libro nostro accidisse, satis evidenter significant vestigia editionis numeris adstrictae per librum dispersa, ut 27, 16. ततस्तु etc.; 30, 11. अलक्ष्येण etc.

Tribus usus sum codicibus Londinensibus, qui tantum inter se discrepant, ut mihi e singulis eligenda essent, quae maxime facerent ad rem Sanscritice narrandam, quamvis vel ita loci remanerent nonnulli manifesta sermonis labe foedati: quorum qui contra grammaticam peccabant, ad eius regulas

revocavi; qui ineleganti tantum sermone offendebant, eos intactos reliqui.

Alterius collectionis, quae sub nomine Tutinameh i. e. libri psittaci, etiam in linguam Germanicam migravit, licet non ex India ipsa, sed ex Perside et Anglia, unum tantum apographum Londini repperi. A quo congestae fuerint septuaginta huius corporis fabulae, quarum primam edidi, traditum non invenio; probabile est, etiam has desumptas fuisse ex antiquiore editione poetica, si comparantur disticha p. 38, 17. अन्यत्र etc.; p. 42, 2. त्याग्रेन etc., p. 43, 16. यदि ते etc.; adde quod p. 45, 11. legitur cuiusque numeros in notis restitui. Etiam huius libri locos nonnullos coniecturis emendatos exhibui.

Locus quem e Bharatea descripsi, legitur in edit. Calcutt. Vol. I. p. 203. Episodium de Kan'd'u, Germanice a Viro summo, Schlegelio, qua solet elegantia conversum *), Sanscritice primus edidi e tribus Brahmapurán'ae exemplaribus, duobus Londinensibus, uno Parisino, nullo foedissimis maculis immuni, ita ut etiam hunc locum edenti coniectandi munere multo saepius quam vellem defungendum mihi esset.

---

*) Biblioth. Ind. I. p. 258.

Neque ad postremum hunc locum neque ad fabulas Milesias adieci varietatem scripturae; sordes enim, quibus stabula Augiae purgavi, lectoribus proponere nolebam.

Sequitur caput primum tersi et elegantis poematii, Ritusanhára nomine, quod Kálidásae adscribitur, idque recte, si quid video. Ineditum etiam hoc dicere licet, editio enim, quam curavit illustris Indicarum litterarum conditor, Jonesius, ex oculis hominum prorsus evanuit, neque ego unquam eius inspiciendi copiam nactus sum, sed descripsi quam edidi partem ex exemplari Parisino, in quo cetera desiderantur. Pauci tantummodo loci medelam criticam, ope numerorum inventu facilem, flagitabant.

De Dhúrtasamágama comoedia plura iam in institutionibus linguae Pracriticae App. p. 28. disserui. Aetatem operis, quam ante hos duos annos ignorabam, nunc mihi repperisse videor; vix enim dubium est, quin rex Karn'át'ae Narasinhas, qui in prologo celebratur, idem sit atque is, qui Vig'ajanagarae intra annos post Chr. n. 1487—1508 regnavit; cuius rei testes sunt locupletes inscriptiones nuper editae atque a Wilsone, viro de litteris Indicis meritissimo, quem doctiorem dicamne, an

humaniorem, nescio, illustratae.*) Regulus autem Kaljân'ae, qui a quibusdam scriptoribus sed falso, uti apparet, memoratur Çrîrângas, non diversus esse videtur a nostrae comoediae conditore, qui quum magistrum regis Narasinhae semel dicit, eo ipso vocabulo Rânga utitur p. 67, l. 2. Itaque prorsus recentioris aevi est opus; quae tamen res minime obstitit, quominus id publici iuris facerem, praesertim quum e comoediis Indicis omnino nulla dum in lucem emissa fuerit. Neque a consilio meo alienum erat, etiam Pracritici sermonis specimina quaedam addere. Descripsi, uti l. l. dixi, e codice Parisino unico satis bonae notae; loci Pracritici ad regulas grammatices revocandi erant, quod tacite facere licuit; saepius etiam interpretatione Sanscritica donandi, ut in annotatione indicavi. Quae praeterea aut mutavi aut mutanda censeo, ea eodem loco significavi.

Ultimo denique loco posui hymnos Vêdicos septem ante hos octo annos a Friderico Rosenio editos, quem praemature sibi ereptum lugent Musae Indicae. Ad antiquissimae enim Vêdicae dialecti studium, quantum in me est, incitare iuvenum

---

*) Ass. Ress. XX. I. p. 11.

animos molior atque haud scio, an nulla exstent Indicae linguae monumenta digniora, in quibus cura nostra critica versetur, tum propter luculenta, quae in iis continentur, priscae vitae ac primaevae religionis vestigia, tum propter sermonis genus simplex illud atque arte omni destitutum, sed nativa quadam iucunditate perfusum, ideis primaevorum hominum totum refertum ac prodiga quasi formarum ubertate varios nascentis linguae nisus exhibens. Neque ullum est genus litteraturae Indicae, in quo pertractando opus sit maiori acumine vel severioribus artis criticae principiis.

Quae quum ita sint, e re videbatur locos quosdam Vêdicos licet breviores libro meo addere, quibus explicandis viam aliqua ex parte praemunirem iuvenibus iis, quos maiori hymnorum collectioni mox in lucem emittendae operam navaturos esse spero.

In glossario adornando id potissimum spectavi, ut iis satisfieret, in quorum usum totum librum edidi; hos grammatices iam peritos esse volo, ut vulgatiores linguae formas enodare ipsi possint. Eorum caussa plerumque ad locos, quibus voces quaeque leguntur, provocavi eo consilio, ne tirones incerti haererent, utrum vocabulum quod quaerant,

vere repperint, necne. Etymă vocum certa aut probabilia semper indicavi, omissis quae in lexicis Indicis et falsa et dubia magno numero feruntur. Summopere enim refert in Sanscriticis docendis tum propter naturam ipsius linguae, tum propter penuriam, qua laborant vel lexica maiora, ut tirones explicare et diiudicare discant etiam ea vocabula, quae a lexicographis omissa sunt, modo ea ad normas linguae certas derivata sint. In explicandis vocabulorum significationibus id difficultatis habet glossarium brevius, ut saepius addendae sint plures significationes intermediae, si eam, quae sola explicanda erat, rite ab origine sua derivare velis, aut, si brevitati studens omittere mavis gradus intermedios, iuxta ponendae sint saepius significationes, nullo iusto vinculo inter se coniunctae. Inter utrumque scopulum, nimium dico brevitatis studium et iusto prolixiores significationum notationes, a media quam tenere volui, via utinam ne nimis saepe aberrarim.

Ceterum, quum lexica, quae ab Indis confecta vel ex Indicis in nostras linguas tralata adhuc sunt, multum absint, ut vel usitatissima vocabula omnia enotata contineant, spero fore, ut praeter tirones etiam doctiores haud sine fructu quodam parvulum

hoc glossarium nonnunquam evolvant; quod si fecerint, facile, opinor, invenient, cur non pauca in vocabulis tum definiendis, tum derivandis innovarim.

Quod reliquum est, etiam atque etiam omnes rogo, qui hoc libello sint usuri, ut boni eum consulant.

Dabam Bonnae ad Rhenum mense Augusto MDCCCXXXVIII.

# Anthologia Sanscritica.

## ॥ अथ वेतालपञ्चविंशती ॥

प्रणम्य शिरसा देवं गणनाथं विनायकं ।
लोकानां च विनोदाय करिष्यामि कथामिमां ॥

प्रारभ्यते न खलु विघ्नभयेन नीचैः ।
प्रारभ्य विघ्नविहता विरमन्ति मध्याः ।
विघ्नैः सहस्रगुणितैरपि हन्यमानाः ।
प्रारब्धमुत्तमगुणा न परित्यजन्ति ॥

केचित् प्राञ्जलिमिच्छन्ति केचिद्वक्रां वचो बुधाः ।
केचित् कथां रसस्फीतामतः सर्वं विधीयते ॥

अस्ति दक्षिणापथे जनपद उज्जयिनी नाम नगरी। तत्र विक्रमादित्यो नाम राजा । कीदृशो राजा ।

कन्दर्प इव रूपाढ्यो हरिवज्जनवल्लभः ।
समुद्र इव मर्यादी सनानः सर्वदा सतां ॥
प्रभूतवीर्यो यशस्वी शरच्चन्द्रांशुनिर्मलः ।
नानारत्नयुतो नित्यं नानाधर्मपरायणः ॥
एवमादिगुणैराढ्यो बभूव कुलनन्दनः ।

साधूनां पालनं सम्यग्दुष्टानां संग्रहस्तथा ॥

एवं गुणसमाविष्टो राजा सर्वावसरं राजसभायामुपविष्टोऽस्ति। अथ कस्मिंश्चिद्दिवसे कुतोऽपि स्थानात् शान्तिशीलो नाम योगी दिगम्बरो राजसभायां समायातः फलहस्तः सन्। स सभां प्रविश्य राज्ञो हस्ते फलं दत्तवान्। राज्ञासनं दत्तं ताम्बूलं च। स तु क्षणमासने स्थित्वा ततो निजमार्गे गतः। अनपर्त्या राज्ञो हस्ते फलं दत्वा प्रत्यहं दर्शनं करोति। एकस्मिन् दिवसे राज्ञो हस्तात् पतितं फलं मर्कटेन विदारितं। तन्मध्याद्रत्नमेकं भूमौ निपतितं। तस्य कान्त्या महान् उद्द्योतो जातः। तदा राजा साश्चर्यो बभूव। राज्ञोक्तं। भो दिगम्बर महद्रत्नं केन कारणेनानीतं। तदा दिगम्बरेणोक्तं।

विक्तपाणिर्न पश्येत राजानं भिषजं गुरुं।
दैवज्ञं पुत्रकं मित्रं फलेन फलमादिशेत् ॥

महाराज ईदृशान्येव महारत्नानि बहूनि तव हस्ते समर्पितानि। तच्छ्रुत्वा भाण्डागारिकस्य प्रत्यादेशो दत्तः। भो भाण्डागारिक अनेन दिगम्बरेण दत्तानि यानि फलानि भाण्डागारे क्षिप्तानि तानि गवाक्षा-पित्वानय। भाण्डागारिकस्तानि गृहीत्वा समागतः।

प्रत्येकमुद्घाट्य दृष्टानि सर्वाण्यपि रत्नैः पूर्णानि। ततो राज्ञा रत्नसमूहं दृष्ट्वा भणितं। भो दिगम्बर सर्वाणि रत्नानि बहुमूल्यानि किमर्थमानीतानि। एकस्यापि रत्नस्य मौल्यं दातुमसमर्थोऽहं। त्वमतः परं यदभिलससि तत् कथय। योगिनोक्तं।

अपि स्वल्पतरं कार्यं यदि स्यात् पृथिवीपते।
सभामध्ये न वक्तव्यं प्रोवाचेदं बृहस्पतिः॥
सिद्धमन्त्रौषधीं धर्मं गृहच्छिद्रं च मैथुनं।
कुभुक्तं कुत्सितं कर्म मतिमान् न प्रकाशयेत्॥
षट्कर्णो भिद्यते मन्त्रश्चतुष्कर्णः स्थिरो भवेत्।
द्विकर्णस्य तु मन्त्रस्य ब्रह्माप्यन्तं न गच्छति॥
गिरिपृष्ठे समारुह्य प्रासादे वा रहो गतः।
अरण्ये निर्जने देशे तत्र मन्त्रो विधीयते॥

देव एकान्ते विज्ञापयामि। राज्ञा विजनं कृतं। योगिनोक्तं। देव अस्यां कृष्णचतुर्दश्यां नदीतीरे महाश्मशानेऽघोरमन्त्रसाधनं करिष्यामि। साधिते सति अष्टौ महासिद्धयो भविष्यन्ति।

अणिमा महिमा चैव लघिमा गरिमा तथा।
प्राप्तिः प्राकाम्यमीशत्वं वशित्वं चाष्ट सिद्धयः॥
पुमांस्तु धीरः संपन्नो भवत्युत्तरसाधकः।

यस्मादधीरो मन्त्रस्य सिद्धस्यापि विनाशकः ॥
धीरस्तु निस्तरेत् सर्वं धातृशक्तगुणान्वितः ।
अतोऽहं कर्तुमिच्छामि त्वामेवोत्तरसाधकं ॥

तदर्थं त्वं ममोत्तरसाधको भव । रात्रौ सखड्गेन भवतैकाकिना मत्समीपमागन्तव्यं । तत् प्रतिपन्नं राज्ञा । तदनन्तरं सर्वोपस्करद्रव्याणि गृहीत्वा दिगम्बरश्चतुर्दश्यां महाश्मशानं गतः । राजापि रजन्यां कृष्णवासांसि गृहीत्वा तत्रैव समायातः । सोऽपि राजानं दृष्ट्वा हृष्टरोमा संजातः । योगिनोक्तं । भो राजन् योजनार्द्धे महाश्मशानमस्ति । तत्र शिंशिपावृक्षशाखायां मृतकमवलम्बितमास्ते । तत्र गत्वा मृतकं गृहीत्वा शीघ्रमागच्छ । यदि वदसि तर्हि तन्मृतकं पुनर्वृक्षे यास्यति । तद्वचनमाकर्ण्य असमसाहसिको राजा शिंशिपावृक्षं प्रचलितः । राजा श्मशानं प्राप्य निःशङ्कः स्थितः । तत्र धूमसंकुलं

पाषाणोपस्करयुक्तं श्मशानं भाति भूतले ।
मस्तिष्कलिप्तशुभ्रास्थि कपालचक्रसाकुलं ॥
मण्डितं मुण्डमण्डैश्च काकालकागणालितं ।
गृध्रविहंगमालाभिः कृतप्रलम्बविग्रहं ॥
चञ्चच्चिताग्नितडितं कालमेघ इवोच्छ्रितः ।

त्रिजगत्प्रलयशक्तः कृतोंकार इवान्तकः ॥
दण्डकारण्यसदृशं मारीचचकितान्तरं ।
लङ्कादाह इवोत्पन्नो जीवप्रवृत्तिविघ्नकं ॥
समग्रभूतनिलयं भूतसंघप्रवर्षणं ।
संचरद्भीमपुरुषं द्वितीयमिव भारतं ॥

तत्र गत्वा राजा शिंशिपावृक्षमारुह्य छुरिकया पाशं छित्वा मृतकं स्कन्धे धृत्वोत्तीर्य मार्गे प्रचलितः । कीदृशं शवं

नीलजीमूतसंकाशमर्द्धकेशं भयावहं ।
वर्तुलाक्षं च निर्मांसं प्रेतमुखविभूषितं ॥

ततो राजा यावदुत्तीर्णस्तावच्छवं तत्रावलम्ब्यास्ते । ततो राजा पुनरपि मृतकपाशं छित्वा स्कन्धे कृत्वा यावन्मार्गे गच्छति तावच्छवसंस्थेन वेतालेनोक्तं । भो राजन्

काव्यशास्त्रविनोदेन कालो गच्छति धीमतां ।
व्यसनेन तु मूर्खाणां निद्रया कलहेन वा ॥
विनयेन विना का श्रीः का निशा शशिना विना ।
रहिता सत्कवित्वेन कीदृशी वाग्विदग्धता ॥

राजन् श्रूयतां । तावत् कथानेकां कथयामि ।

अस्ति वाराणसी नाम नगरी । तत्र प्रतापमुकुटो

नाम राजा। तस्य पुत्रो वज्रमुकुटो नाम। स च मन्त्रिपुत्रेण वुद्धिसागरेणोद्यानवन आखेटके गतः। तत्र सकलां मृगयां समनुभूय मध्याह्ने द्वौ सरोवरं ददृशतुः।

हंसकारण्डवाकीर्णं चक्रवाकोपशोभितं।
पद्मकिञ्जल्ककह्लारै रक्तोत्पलैः सितोत्पलैः॥
छादितं पद्मिनीपत्रैर्मत्स्यैः कूर्मैर्जलोद्भवैः।
तटे रम्यैर्घनैर्वृक्षैः केतकीखण्डमण्डितं॥
कदलीकुसुमामोदलुव्धषट्पदकूजितं।
जलकुक्कुटकोयष्टिवीचिसारसशोभितं॥

तत्र तुरंगादवतीर्य हस्तौ पादौ च प्रक्षाल्य तत्समीपे शिवायतनं दृष्ट्वा तत्र गत्वा देवो नमस्कृतः। उक्तं च।

अहौ वा हारे वा वलवति रिपौ वा सुहृदि वा।
मणौ वा लोष्टे वा कुसुमशयने वा दृषदि वा।
तृणे वा स्त्रैणे वा मम समदृशो यान्तु दिवसाः।
क्वचित् पुण्येऽरण्ये शिव शिव शिवेति प्रलपतः॥

ततो यावद्देवं नमस्कृत्य स राजकुमार उपविशति तावत् तस्मिंस्तडागे स्नानार्थं सखीभिः संवृत्ता नायिका समायाता। तत्र स्नानं कृत्वा गौर्यादीनां

पूजां विधाय यावत् समन्ततो निरीक्ष्य गच्छति तावत् तया स राजकुमारो दृष्टः। परस्परं कटाक्षनिरीक्षणं संजातं। शोषणमोहनसंदीपनोच्चाटनोन्मादनैः पञ्चबाणैर्हृदये ताडितः सः। सापि च। तया संकेतस्थानानि कथितानि। मस्तकात् पद्मं गृहीत्वा कर्णे धृतं। कर्णाद्दन्ते धृतं। दन्ताद्धृदये धृतं। हृदयात् पादयोर्धृतं। एवं विधाय सा निजभवनं गता। स च राजकुमारो विरहवेदनया पीडितस्तां स्मरन् जर्जरीभूतशरीरः संजातः। मन्त्रिपुत्रेणोक्तं। भो मित्र केन कारणेन त्वं मूर्छितोऽसि। तत्कारणं मे निवेदय। राजकुमारेणोक्तं। भो मित्र अस्मिंस्तडागे सखीभिः परिवृता काचिन्नायिका समायाता। यद्येषा मम भार्या भवति तदा जीवामि। नो चेन्मरिष्यामि। इत्येष निश्चयः। मन्त्रिपुत्रेणोक्तं। श्रीमद्भिः किं ज्ञातं। राजपुत्रेणोक्तं। न किंचिज्जानामि। एतदाकर्ण्य मन्त्रिणोक्तं।

उदीरितोऽर्थः पशुनापि बुध्यते।
हयाश्च नागाश्च वहन्ति नोदिताः।
अनुक्तमप्यूहति पण्डितो जनः।
परेङ्गितज्ञानपरा हि बुद्धयः॥

आकारैरिङ्गितैर्गत्या चेष्टया भाषणेन च ।
नेत्रवक्त्रविकारैश्च गृह्यते ऽन्तर्गतं मनः ॥

अतो ब्रवीमि । तया किमपि यत् कृतं तन्ममाग्रे निवेदय। राजकुमारेणोक्तं। अहं कथयामि तस्याश्चेष्टितं। मस्तकात् पद्मं गृहीत्वा कर्णे धृतं। कर्णाद्दन्ते धृतं। दन्ताद्धृदये धृतं। हृदयात् पादयोर्धृतं। एवं विधाय गता सा। मन्त्रिपुत्रेण बुद्धिसागरेणोक्तं। तया पद्मं गृहीत्वा यत् कर्णे धृतं तत् तयेति कथितं। कर्णकुब्जे नगरे वसामि। दन्ते धृतं यत् तत् कथितं। दन्तघातस्य दुहिताहं। हृदये यत् तच्चापि कथितं। त्वमेव प्राणप्रियो मम हृदये वससि। पादयोर्यद्धृतं तत् तयेति कथितं। मम पद्मावती नाम। इति मन्त्रिपुत्रस्य वचनं श्रुत्वा राजकुमारेणोक्तं। यदाहं तां प्राप्नोमि तदा जीवामि। नो चेन्मरिष्यामि। उत्तिष्ठ मित्र यत्र सा प्राणप्रिया वर्तते तत्र गत्वा मया भोजनं कर्तव्यं। तस्माद्वनान्तरात् तौ तत्क्षणात् तस्मिन् नगरे प्राप्तौ। तत्र वृद्धा दूती प्रतिवसति। तद्गृह उत्तीर्णौ। राज्ञा सा पृष्टा। हे वृद्धे त्वं सदा तस्मिन् नगरे वससि। तयोक्तं। सदाहमस्मिन् नगरे वसामि। राजपुत्रेणोक्तं। दन्तघातस्य

दुहिता पद्मावती नाम तिष्ठति। तयोक्तं। तिष्ठति। तस्याः समीपे निरन्तरं यास्यामि। मन्त्रिपुत्रेणोक्तं। हे मातस्त्वया तस्या अग्रे गन्तव्यं। तर्हि राजकुमारेण पुष्पग्रन्थनं कृतं। सा चापरकार्ये प्रेषिता। तत् कृत्यं विधाय पुनः समायाता। राजकुमारेणोक्तं। पुष्पमालां गृहीत्वा पद्मावतीसमीपे गच्छ त्वं। गत्वा वाच्यं च। योऽसौ राजकुमारस्त्वया सरोवरे दृष्टः स समायातो दृश्यते। तया दूत्या तत्र गत्वा पद्मावत्या अग्रे सर्वो वृत्तान्तो निवेदितः। पद्मावत्यापि पुष्पग्रन्थनादेव तत् परिज्ञातं। पुनश्च मिथ्याकोपं विधाय श्रीखण्डेन हस्तौ विलिप्य तस्याः कपोलौ ताडितौ। कुपिता चेति कथितवती। यदि त्वमीदृशं वचनं ममाग्रे कथयसि तदा घातयामि। इदानीं गच्छ। सा निष्काशिता। अथागता सा दुर्मुखी यत्र राजकुमारोऽस्ति। तस्या मुखमवलोक्य राजकुमारो विषादमगमत्। तया च सर्वं कथितं। राजपुत्रेणोक्तं। मित्र किमेतत्। मन्त्रिपुत्रेणोक्तं। त्वया विषादो न कार्यः। कारणं विद्यते। चन्दनावलिप्ताभ्यां कराभ्यां यत् सा ताडिता तेन कथितं। दश दिवसाः प्रतीक्ष्या यावत् कृष्णपक्षः

समायाति। तदा दशाहे समतिक्रान्ते सा भूयः पि- प्रेषिता। तदा पद्मावत्या तिसृभिरङ्गुलीभिः कुङ्कुमावलिप्ताभिस्तस्याः कपोलौ ताडितौ। निष्काशिता च। तामायान्तीं विलोक्य राजकुमारो विषादं गतः। उक्तं च। किं क्रियते। अद्य मे निश्चयेन मरणं भविष्यति। मन्त्रिपुत्रेणोक्तं। धीरो भव। कारणं विद्यते। देव सांप्रतं सा रजस्वला वर्तते।

प्रथमे ऽहनि चाण्डाली द्वितीये ब्रह्मघातिनी।
तृतीये रजकी प्रोक्ता चतुर्थे ऽहनि शुध्यते॥

चतुर्भिर्दिवसैरतिक्रान्तैर्भूयो ऽपि सा प्रेषिता। पद्मावती च तामागच्छन्तीमवलोक्य रज्जुभिर्बद्धार्द्धचन्द्रं दत्वा पश्चिमद्वारेण निष्काशितवती। आगता सा दुर्मुखी भूत्वा सर्वं वृत्तान्तं कथितवती। मन्त्रिपुत्रेण विचार्य कथितं। देव अर्द्धरात्रौ पश्चिमद्वारेण तस्याः समीपे गन्तव्यं। तच्छ्रुत्वा राजकुमारस्य तद्दिनं वर्ष- शताधिकमिव जगाम। ततश्च रात्रौ शृङ्गारं विधाय मित्रेण सह पश्चिमद्वारे गतः। ततश्च दृढरज्जुभि- राकृष्य चेटिकाभिर्भवनोपरि नीतः। मन्त्रिपुत्रो व्यावृत्य स्ववासं गतः। तस्य राजकुमारस्य पद्मा- वत्या दर्शनं संजातं। संभाषणं कुशलप्रश्नश्च संवभूव।

ततः स्नानं भोजनं च कृत्वा वस्त्रादि भूषणं सुगन्धादि लेपनं च ताम्बूलमेव च गृहीत्वा सुखं शय्यायामुपविष्टः। तया सह चतुर्भिः प्रकारैः संभोगः कृतः।

आघ्राणकं सुरतं नाम दंपत्योः पार्श्वसंस्थयोः ।
जायन्ते विविधाश्लेषाः समीभूतशरीरयोः ॥
अधःस्था रमते नारी उपरिष्ठस्तु कामुकः ।
प्रसिद्धं तद्रतं ज्ञेयं ग्रामबालजनप्रियं ॥
उपरिष्ठा यदा नारी रमते कामुकं नरं ।
विपरीतं तद्रतं ज्ञेयं सर्वकामिजनप्रियं ॥
पशुवद्रमते नारीं यदा पृष्ठस्थितो नरः ।
पाशवं तद्रतं ज्ञेयं सर्वकामिजनप्रियं ॥
गाढालिङ्गनकामिनी कृतकुचप्रोद्भूतरोमोद्गमा ।
सान्द्रस्नेहरसातिरेकविगलच्छ्रीमन्नितम्बाम्बरा ।
मा मा मानद माति मामलमिति क्षामाक्षरोल्लापिनी।
सुप्ता किंनु मृता नु किं मनसि मे लीना विलीना नु किं

एवं नानाप्रकारैः सुरतसंभोगं विधाय राजकुमार उपविष्टः सन् तया पृष्टः। भो देव ममाभिप्रायो भवता मन्त्रिणा वा ज्ञातः। राजकुमारेणोक्तं। मया न ज्ञातं किंचित्। मम मन्त्रिपुत्रेण सर्वं ज्ञातं। तयोक्तं। तुष्टाहं तव मित्रस्य। प्रातश्चूर्णिकां करिष्यामि।

तत्प्रभाते राजकुमारेण मित्रसमीपे गत्वा सर्वो वृत्तान्तो निवेदितः । उक्तं च ।

ददाति प्रतिगृह्णाति गुह्यमाख्याति पृच्छति ।
भुनक्ति भुञ्जापयति षड्विधं प्रीतिलक्षणं ॥

भो मित्र तव कृते मध्याह्ने भोजनार्थं समागमिष्यति । तच्छ्रुत्वा मन्त्रिपुत्रेण भणितं । देव मम योग्यविषलड्डूका समागमिष्यति । यावदेतद्वर्तते तावद्विषलड्डूकां गृहीत्वा चेटिका समायाता । तावदवलोक्य लड्डूकामेकां शुनोऽग्रे निक्षिप्तवती । भक्षितमात्रेण मृतः श्वा । श्वानं मृतं दृष्ट्वा स राजकुमारः कुपित उवाच । तया सह संगमं न करिष्यामि । मम मित्रस्य घातकीयं । मित्रेणोक्तं । त्वया सह देव कारणं । तथा प्रोक्तं । जननीं जन्मस्थानं लोकप्रवादवस्तूनि जीवं च पुरुषविशेषांश्च सीमन्तिन्यस्तृणमिव मन्यन्ते । उक्तं च ।

यस्य वान्नानि भुञ्जीत गृहे वाप्युषितं तथा ।
कर्मणा मनसा वाचा हितं तस्य समाचरेत् ॥
क्षीरन्नीरसमं मित्रं प्रशंसन्ति विचक्षणाः ।
नीरं क्षीरयति तत्र वह्नौ तप्यति तत् पयः ॥

किं बहुना मम भाषितेन कर्तव्यं । भो देव अस्य

निशीथसमये सुरतसौख्यमनुभूय परं तीक्ष्णनखाग्रैर्वामजङ्घायां त्रिशूलाघाताकृतिं विधाय तस्या वस्त्राभरणानि गृहीत्वा मम समीप आगन्तव्यं त्वया । मन्त्रिपुत्रो महाश्मशाने गत्वा तपस्विविशेषं विधाय स्थितः ॥

जटामुकुटधारी च चन्द्रार्द्धकृतशेखरः ।
वद्धपद्मासनो मौनी ईषन्मीलितलोचनः ॥

पुनस्तत्प्रभाते राजपुत्रेण तस्या वामजङ्घायां त्रिशूलाकृतिं विधाय सर्ववस्त्राभरणानि गृहीत्वा मन्त्रिपुत्रस्याग्रे समर्पितानि । ततस्तेन मन्त्रिपुत्रेण तस्या अङ्गुलीयकं दत्वा राजकुमारः कोटिपालं प्रेषितः । तेन तत्र गत्वा कोटिपालस्याग्रे दर्शितं तैश्चैर्लक्षितं । राजदुहितुराभरणमिदं इति तेन कोटिपालेन धृतोऽसौ । भणितं च । भो शास्त्रपाणे कुतो लब्धमिदमाभरणं । तेनोक्तं । मदीयगुरुणा दत्तं । तच्छ्रुत्वा गुरुसंनिधौ नीतः । कोटिपालेन गुरुः पृष्टः । भो तापस कुतो लब्धमिदं राजकीयनामाङ्कितमाभरणं । भट्टारकेणोक्तं । अत्र कृष्णचतुर्दश्यां रक्तपुष्पैर्मण्डलं पूजयित्वा योगिन्यः पुरुषमेकं विदार्य भागं कृत्वा यावद्भक्षयन्ति तावन्मया दृष्टाः । त्रिशूलं गृहीत्वा

तासां समीपं गतोऽहं । ततो मदीयं क्रोधवचनमाकर्ण्य दशदिशि प्रधाविताः । तासां मध्य एका वामजङ्घायां त्रिशूलेन ताडिता । भयवशाद्वस्त्राभरणानि पतितानि । तदा मया गृहीतानि । तद्वचनमाकर्ण्य कोटिपालेन राजाग्रे सर्वो वृत्तान्तो निवेदितः । तत् सर्वं श्रुत्वा राजा चेटिकाग्रे भणितवान् । त्वया पद्मावतीं विवस्त्रां कृत्वा वामजङ्घायां लक्षणमवलोकितव्यं । राजादेशेन तत्र गत्वा पद्मावतीं विलोक्य लक्षणं दृष्ट्वा राजाग्रे भणितं । भो देव कोटिपालेन यद् भणितं तत् सत्यमेव । उक्तं च ।

अर्थनाशं मनस्तापं गृहे दुश्चरितानि च ।
गृञ्जनं चापमानं च मतिमान् न प्रकाशयेत् ॥

राज्ञोक्तं । भो कोटिपाल पुनरपि गत्वा तं मुनीन्द्रं पृच्छ । कोऽस्या दण्डः क्रियते । कोटिपालेन गत्वा भट्टारकः पृष्टः । भो भगवन् कोऽस्या दण्डः क्रियते । भट्टारकेणोक्तं ।

अवध्या ब्राह्मणा गावः स्त्रियो बालाश्च ज्ञातयः ।
येषां चान्नानि भुञ्जीत ये च स्युः शरणं गताः ॥

महत्यपराधेऽपि स्त्रीणां विसर्जनं दण्डः । ततो भूमिनाथेनापरीक्षितेन पद्मावती निजनगरान्निष्का-

शिता। तदा ताभ्यां तां हयपृष्ठमारोप्य स्वनगरीं गत्वा कुमारेण सह विवाहः कृतः। उक्तं च।

सुगुप्तस्यापि मल्लस्य श्लाघ्यत्वं न गच्छति।
कोकिलो विष्णुरूपेण भजते राजकन्यकां॥
अपरीक्षितं न कर्तव्यं कर्तव्यं सुपरीक्षितं।
पश्चाद्भवति संतापो ब्राह्मण्या नकुले यथा॥
कृतान्तविहितं कर्म यद्भवेत् पूर्वनिर्मितं।
न शक्यमन्यथा कर्तुं पण्डितैस्त्रिदशैरपि॥
रामो हेममृगं न वेत्ति नहुषो नो यान् युनक्ति द्विजान्।
विप्रादेव सवत्सधेनुहरणे जाता मतिश्चार्जुने।
द्यूते भ्रातृचतुष्टयस्वमहिषीं धर्मात्मजो दत्तवान्।
प्रायः सत्पुरुषो विनाशसमये बुद्ध्या परित्यज्यते॥

एतत् कथानकं कथयित्वा वेतालेनोक्तं। राजन् कथय कस्य पापं भवति। यदि जानन्नपि न कथयिष्यसि तदा हृदये स्फुटित्वा मरिष्यसि। राज्ञा विक्रमसेनोक्तं। अविचारेण नृपस्य पापं भवति। एवं श्रुत्वा गतो वेतालः। गत्वा च तत्रैव शिंशिपावृक्षस्य शाखाया-मवलम्बितः॥

इति शिवदासविरचितायां वेतालपञ्चविंशतिकायां कथायां प्रथमं कथानकं समाप्तं॥ १॥

अथ राजा पुनरपि तत्रैव गत्वा मृतकं स्कन्धे धृत्वा यावन्मार्गे प्रचलितस्तावत् तेन कथानकं प्रारब्धं। वेतालेनोक्तं। भो राजन् श्रूयतां तावत् कथेयं। अस्ति धर्मस्थलं नाम नगरं। तत्र राजा गुणाधिपो नाम। तत्रैव च केशवो नाम ब्राह्मणोऽस्ति। तस्य दुहिता मन्दारवती नाम रूपेणातीव विख्याता। सा च वरयोग्याभवत्। तस्या अर्थे चत्वारो वराः समायाताः। चत्वारोऽपि समानगुणा ब्राह्मणाः। केशवश्चिन्तां प्रपन्नो बभूव। एका कन्या चत्वारो वराः। कस्मै देया कस्मै न देया। एतस्मिन्नेव प्रस्तावे केशवस्य दुहिता कालसर्पेण दंशिता। तदर्थे मन्त्रवादिनः समानीताः। तैर्मन्त्रवादिभिस्तां विलोक्य भणितं। कालदष्टा न जीवति कन्येयं।

यतः। पञ्चमी नवमी षष्ठी चतुर्दश्यष्टमी तथा।
तिथयो गर्हिता ह्येता दष्टस्य मरणात्मकाः॥
भौमं शनैश्चरं चैव ग्रहाणां ग्रहसंज्ञितं।
अशस्तं नागदष्टस्य निर्दिष्टं शास्त्रकोविदैः॥
रोहिणीं च मृगशीर्षं विशाखां मूलकृत्तिकां।
आतुरस्याशुभान्याहुरार्द्रानक्षत्रसप्तमे॥
कण्ठललाटशिरसि बाह्वोर्जङ्घोरुयुग्मके।

तथा पाणौ हृन्मध्ये च यो दष्टः स न जीवति ॥
जीर्णोद्याने श्मशाने च चैत्ये च धवलागृहे ।
एषु क्षेत्रेषु ये दष्टा यान्ति ते यमसादनं ॥
दाहः स्वेदश्च वमनं हिक्का शूलाङ्गजृम्भकं ।
भ्रमणं प्राणनाशश्च कालदष्टस्य चेष्टितं ॥
ग्रीवाभग्नः स्खलद्वाग्मी विपरीतोर्ध्वमारुतः ।
म्रियते स न संदेहः किमन्यैर्बहुभाषितैः ॥

ततो मान्त्रिकवचनं श्रुत्वा तदनन्तरं ब्राह्मणः केशवो नदीतीरे गत्वा तस्याः संस्कारं चकार । चत्वारो ऽपि वराः श्मशाने समायाताः । तेषां मध्ये एकश्चितायां प्रविश्य मृतः । द्वितीयेन तस्या अस्थीनि तद्भस्म च श्मशाने कुटीरकं कृत्वा रक्षितानि । तृतीयस्तपस्वी भूत्वा देशान्तरं गतः । तुर्यो निजभवनं गतः । यो देशान्तरं गतः तेन देशान्तरे कस्यचिद्ब्राह्मणस्य गृहे गत्वा मध्याह्ने भोजनं प्रार्थितं । गृहस्थेन ब्राह्मणेन भणितं । भो तपस्विंस्त्वयात्रैव भोजनं कार्यं । तावद्ब्राह्मण्या भोजनं निष्पादितं । आसनं च दत्त्वोपवेशितः सः । तावत् तस्या बालकेन गृहे रोदितुमारब्धं । गृहस्थया ब्राह्मण्या स बालो ज्वलिताग्नौ प्रक्षिप्तः । तद् दृष्ट्वा तेन भिक्षुणा

चलितं। तेन ब्राह्मणेन स तु निवारितः। तेन भणितं। तद् दारुणकर्म दृष्ट्वा सहभोजनं न करोमि। यस्य गृहे ईदृशं राक्षसं कर्म दृश्यते तस्य गृहे कथं भोजनं करणीयं। तत् श्रुत्वा तेन गृहस्थेन ब्राह्मणेन गृहमध्ये प्रविश्य पुस्तकमानीतं। तदुद्घाट्य मन्त्रमेकं जपित्वा बालको भस्मीभूतो जीवापितः। तपस्विना ब्राह्मणस्य कौतुकं दृष्ट्वा चिन्तितं च। यदि मम हस्ते पुस्तकीयं घटति तदाहं तां प्रियां जीवापयामि। इति संचिन्त्य तत्रैव निभृतो भूत्वा स्थितः। निशीथे गृहमध्ये प्रविश्य तत् पुस्तकमपहृत्य तत्रैव श्मशाने समायातः। यः श्मशाने तिष्ठति तेन पृष्टः। भो मित्र देशान्तरे गत्वा काचिद्विद्या समाज्ञाता। तेनोक्तं। मृतसंजीविनी विद्या मया समाज्ञाता। द्वितीयेनोक्तं। तर्हि इमां प्रियां जीवापय। तत् श्रुत्वा तेन पुस्तकमुद्घाट्य मन्त्रमेकं जपित्वा जलेन सिक्त्वा जीवापिता कन्या। यः सहैव मृतः सोऽपि जीवितः। यो गृहे गतस्तेन श्रुत्वायातमपि। तस्या अर्थे क्रोधान्धलोचनाश्चत्वारोऽपि प्रविवादं कुर्वन्ति॥

एतत् कथानकं कथयित्वा वेतालेनोक्तं। भो राजन् कथय कस्य भार्या भवति। राज्ञा विक्रमसेनेनोक्तं।

श्रूयतां। येन जीवापिता कन्या स पिता जीवदायकः। यः सहैव मृतः सोऽपि भ्राता सहैव यातः। येन श्मशाने भस्मनाशं गृहीत्वा स्थितं सोऽपि नीचकर्मा दासस्तस्याः। भर्ता स भवति यो गृहे गतः॥ एवं श्रुत्वा गतो वेतालस्तत्रैव शिंशिपावृक्षशाखायां अवलम्बितः॥

इति द्वितीयं कथानकं समाप्तं ॥ २ ॥

---

अथ राजा पुनस्तत्रैव गत्वा मृतकं स्कन्धे धृत्वा यावन्मार्गे प्रचलितस्तावत् तेन कथानकं प्रारब्धं। वेतालेनोक्तं। भो राजन् श्रूयतां। तावत् कथां कथयामि॥

अस्ति भोगवती नाम नगरी। तत्र रूपसेनो नाम राजा। तस्य धवलगृहे विदग्धचूडामणिर्नाम कीरोऽस्ति। स च राज्ञा पृष्टः। भो शुक किं किं जानासि। तर्हि कथय। ममानुरूपा भार्या काश्चिदस्ति। शुकेनोक्तं। देव मगधदेशे मगधेश्वरो नाम राजा। तस्य दुहिता सुरसुन्दरी नाम। सा तव भार्या भविष्यति॥ मगधेश्वरस्य दुहिता निजभवने

स्थिता सती मदनमञ्जरीं नाम शारिकां पृच्छति स्म। शारिके कथय। ममानुरूपो भर्ता क्वास्ति। शारिकयोक्तं। देवि भोगवती नाम नगरी। तत्र रूपसेनो नाम राजा। स तव भर्ता भविष्यति। तत् श्रुत्वा विरहपीडिता संजाता सा॥

ततः संधिविग्रहकेण सहानुसरै राज्ञो दर्शनं कारितं। तैर्विशिष्टैर्दुहिता याचिता लब्धा च। तदा शुभे लग्ने रूपसेनेनागत्य परिणीता। मदनमञ्जर्या शारिकया सह निजराष्ट्रे समायाता। राज्ञा रूपसेनेन शारिका विदग्धचूडामणिशुकस्य पञ्जरे निक्षिप्ता। तां शारिकां स्वरूपां दृष्ट्वा शुकेन मदनातुरेण भणितं। हे प्रिये चञ्चले यौवने संभोगः क्रियतां। संसारे सर्वजन्तूनामेतदेव सारं।

श्रेयः पुष्पफलं काष्ठाद् दुग्धाच्छ्रेयो घृतं स्मृतं।
श्रेयस्तैलं च पिण्याकात् कामो धर्मार्थयोर्वरं॥
गतं तद्यौवनं भीरु जीवितं च निरर्थकं।
या न वेत्ति सदा पुंसां चतुराणां रतिक्रमं॥
विदितः पाशवो मार्गः सर्वेषां रतिकर्मणि।
विरलः कोऽपि यो वेत्ति रहस्यं कौसुमायुधं॥
यत्र स्वेदजलैरलम्बि लुलितं व्यालुप्यते मण्डलं।

गेहे देर्गणितेश्च यत्र रणितं विश्रूयते नूपुरं ।
यत्रायात्यचिरेण सर्वविषयाः कामात्मनैकाग्रतः ।
सख्यस्तत् सुरतं भणामि सततं शेषान्यलोकास्थितिः

शारिकयोक्तं । नाहं पुरुषस्य वाञ्छां करोमि । शुकेनोक्तं । कस्मात् कारणात् । शारिकयोक्तं । पुरुषाः पापिष्ठाः स्त्रीघातका भवन्ति । शुकेनोक्तं । स्त्रियोऽपि दुष्टचारिण्योऽनृतभाषिण्यः पुरुषवधं कुर्वन्ति ।

अनृतं साहसं माया मूर्खत्वमतिलोभता ।
अशौचं निर्दयत्वं च स्त्रीणां दोषाः स्वभावजाः ॥

एतयोः परस्परविवादं श्रुत्वा राज्ञा भणितं । भो कथ्यतां विवादकारणं । शारिकयोक्तं । देव पुरुषाः पापिष्ठाः स्त्रीघातका भवन्ति । अतः कारणात् पुरुषस्य वाञ्छामहं न करोमि । देव अस्यार्थे कथानकमस्ति ॥

अस्ति एलापुरं नाम नगरं । तत्र महाधनो नाम श्रेष्ठी । तस्य पुत्रो धनञ्जयो नाम । तेन च पुण्यवर्धने नाम नगरे श्रेष्ठिदुहिता परिणीता । कालपर्यायेण तस्य पिता पञ्चत्वं गतः । तेन धनञ्जयेण सर्वं धनं भवनं च द्यूते हारितं । स च श्वशुरगृहे भार्यानिनयनार्थं गतः । कतिपयदिवसैस्तत्र स्थित्वा

साभरणां भार्यामुत्थाप्य निजनगरमार्गे प्रचलितः। यावदर्द्धे मार्गे गच्छति तावत् कथितं। हे प्रिये अत्र महाभयं विद्यते। तया निजाभरणान्युत्तार्य पुरुषे समर्पितानि। तेन च तस्या आभरणानि वस्त्रं च गृहीत्वा अन्धकूपे पातिता सा गतश्च सः। कैश्चित् पथिकैस्तं शब्दमाकर्ण्य कूपसमीपं गत्वा रुदन्तीं दृष्ट्वा कूपादाकृष्य मार्गे मुक्ता। सा च मार्गे लग्ना सती मार्गे व्यावृत्य पितुर्गृहे समायाता। तैर्बान्धवादिभिः पृष्टा। कस्मात् त्वं व्याघटिता। तयोक्तं। मम भर्ता मार्गे चौरैर्हतः। ममाभरणानि च तैर्गृहीतानि। तत् प्रणष्टाहं भर्तुः शुद्धिं न जानामि व्यापादितो वा भविष्यति। तद्वचनमाकर्ण्य स्वशुरकेण शोकं कृत्वा दुहिताश्वासिता। कतिपयदिवसैरतिक्रान्तैः पुनरपि धनक्षयः स्वशुरगृहे समायातः। यावद् द्वारे तिष्ठति तावन्निजभार्यया दृष्टः। तां दृष्ट्वापि स शङ्कितो बभूव। एषा मया कूपे पातिता कथमत्र दृश्यते। भयवशमापन्नो बभूव। भार्ययोक्तं। स्वामिन् मा भयं कुरु। इति कथयित्वा गृहमध्ये नीतः। स्वशुरकुटुम्बं सर्वं सोत्साहं बभूव। वर्धापनं च कृतं। कतिपयदिवसैस्तत्र स्थित्वा प्रसुप्तां भार्यां

शयने व्यापाद्य तस्या आभरणानि गृहीत्वा स्वनगरे गतः ॥ हे राजन्नेतत् प्रत्यक्षं मया दृष्टं। सर्वथा पुरुषैर्नास्ति प्रयोजनं॥ शुकेनोक्तं।

वाजिवारणलोहानां काष्ठपाषाणवाससां।
नारीपुरुषतोयानामन्तरं महदन्तरं॥

इति श्रुत्वा राज्ञा विदग्धचूडामणिः पृष्टः। भो शुक स्त्रीणां दोषान् कथय। शुकेनोक्तं। श्रूयतां महाराज।

अस्ति काञ्चनपुरनामधेयं नगरं। तत्र सागरदत्तो नाम श्रेष्ठी। तस्य पुत्रः श्रीदत्तो नाम। तेन च श्रीपुरनगरे श्रेष्ठिनः समुद्रदत्तस्य दुहिता परिणीता। तां विवाह्य स्वनगरे समायातः। कतिपयदिवसाभ्यन्तरे व्यावृत्य सा पितुर्गृहे प्रेषिता। स च श्रीदत्तः क्रयाणकानि वसूनि गृहीत्वा वाणिज्ये समुद्रपारं गतः। तत्र कानिचिद्वत्सराणि लग्नानि। सा च पितुर्गृहे वर्धमाना सती यौवनवती बभूव। सापि भवने परिस्थिता सती राजमार्गावलोकनं करोति। एकस्मिन् दिवसे युवा पुरुष एको दृष्टः। परस्परं कटाक्षनिरीक्षणं संजातं। तया निजसख्या अग्रे कथितं। पुरुषमेनं मम समीपमानय। इति श्रुत्वा तया तस्य समीपे गत्वा भणितं। पुरुष हे

मन्मथावतारश्रेष्ठिसमुद्रदत्तस्य तनया त्वया सह एकान्ते मनोरथमभिलसति। प्रतिपन्नं तेन। रात्रौ तव गृहे आगमिष्यामि। उक्तं च।

सुस्नातं पुरुषं दृष्ट्वा सुगन्धं मलवर्जितं।
क्लिद्यन्ते योनयः स्त्रीणामब्जपत्रमिवाम्भसा॥
घृतकुम्भसमा नारी तप्ताङ्गारसमः पुमान्।
संश्लेषाद्द्रवते कुम्भस्तद्वत् स्त्री पुंसा भाविता॥

मालाकारीसखीगृहे द्वाभ्यां संघट्टनं कृतं। परस्परं प्रीतिरुत्पन्ना। अन्येद्युः परिणीतभर्ता भार्यामुत्थापनाय श्वशुरगृहे समायातः। भर्तारमागतं दृष्ट्वा सा चिन्तापन्ना बभूव। किं करोमि। क्व गच्छामि। को मां धर्तुं समर्थः। न बुभुक्षा न तृषा न निद्रा न शीतोष्णं रोचते। सर्वं सख्या अग्रे कथितं॥

प्रविलसदनुरागाद् दूतिकां प्रेष्य पूर्वं।
सरभसमभिधाय क्वापि संकेतभूमिं।
न मिलति खलु यस्या वल्लभो दैवयोगात्।
प्रवदति भरतस्तां नायिकां विप्रलब्धां॥

यामातृको वैकालिकं शयनोपवासे प्रसुप्तः। सापि मात्रा बलात्कारेण पत्युः समीपे प्रेषिता। सा तत्र गत्वा पराङ्मुखी भूत्वा प्रसुप्ता। यथा यथा भर्ता तया

सह स्नेहवचनानि वदति तथा तथाधिकं दुःखं भवति। एवं पराङ्मुखी भूत्वा शयने स्थिता। अथ भर्तारं निद्रावशं ज्ञात्वा शनैः शनैः शयनादुत्थाय संकेतस्थानं निशीथसमये चलिता। यावच्च व्रजति तावच्चौरेण दृष्टा चिन्तितं च। एषा साभरणा कुत्र गच्छति। इति पृष्ठतो लग्नः।

यतः। पतित्यक्ता तु या नारी गृहादन्यत्र गच्छति।
विटेषु रमते नित्यं स्वैरिणीं तां विनिर्दिशेत्
या दूतिकागमनकालमपारयन्ती।
सा दुःसहस्मरजलार्त्तिपिपासितेव।
निर्यातवल्लभजनाधरपानलोभात्।
सा कथ्यते मुनिवरैरभिसारिकेति॥

सोऽपि तस्याः प्रियः संकेतस्थाने चौरेण भणित्वा केनापि व्यापादितोऽस्ति। सापि विरहेण पीडिता सती मृतकमालिङ्गनं करोति। मृतोऽयं इति न वेत्ति। विलेपनताम्बूलादिकं दत्तं। पुनः पुनः स्नेहान्मुखं चुम्बति। चौरोऽपि दूरस्थोऽपि सर्वं वृत्तान्तं पश्यति। चिन्तितं च॥

यां चिन्तयामि सततं मयि सा विरक्ता।
साप्यन्यमिच्छति जनं स जनोऽन्यरक्तः।

अस्मत्कृतेऽपि परिशुष्यति काचिदन्या ।
धिक् तां च तं च मदनं च इमां च मां च ॥

यावदेतद्वर्तते तावत् तत्रस्थितेन वटवृक्षाधिष्ठेन पक्षिणा चिन्तितं । अहमस्य मृतकस्य शरीरे संक्रमणं विधाय तया सह संभोगं करिष्यामि । संभोगं कृत्वा तस्या नासिकां दन्तैश्छित्वा स पक्षी गतः । सा रुधिरचर्चितसर्वाङ्गी सख्याः समीपे गत्वा सर्वं वृत्तान्तं कथितवती । सख्योक्तं । यावदादित्योदयो न भवति तावत् परिणीतभर्तुः समीपं गत्वा गुरुतरशब्देन रोदितव्यं । इति श्रुत्वा तदा तत्र गत्वा गुरुतरशब्देन रोदितमारब्धं । तच्छब्दमाकर्ण्य कुटुम्बलोकः प्रधावितो यावत् पश्यति तावच्छिन्ननासिका दृष्टा । तैरुक्तं । हे निर्लज्ज पापिष्ठ हे क्रूरकर्मन् निरपराधतया त्वयास्माकं दुहितुर्नासिकाछेदः कथं कृतः किमिति विहितः । यामातृकश्चिन्तापन्नो बभूव । तेनोक्तं ।

न विश्वसेत् कृष्णसर्पे खड्गहस्तस्य वैरिणः ।
आश्चर्यचलचित्तस्य त्रिचरित्रे न विश्वसेत् ॥
कवयः किं न पश्यन्ति किं न भक्षन्ति वायसाः ।
मद्यपाः किं न जल्पन्ति किं न कुर्वन्ति योषितः ॥

अश्वप्लुतं माधवगर्जितं च स्त्रीणां चरित्रं भवितव्यतां च
अवर्षणं संवर्षणं च देवो न वै विजानाति कुतो मनुष्यः

ते राजकुले गत्वा यामातृकः समर्पितः । राजपुरुषैर्न्यायः कृतः । वध्योऽयं पुरुषः । यावद्वध्यस्थाने नीयते तावच्चौरः समायाति । भणितं च । भो राजपुरुषा अवध्योऽयं पुरुष इति सर्वं प्राग्वृत्तान्तं तेषामग्रे कथितवान् । धर्माधिकारिपुरुषैर्यथाकार्यं विचार्य यामातृको मुक्तः ।

साधूनां पालनं सम्यग् दुष्टानां निग्रहस्तथा ।
एष राज्ञां परो धर्मः परत्रेह च शर्मणे ॥
प्रजानां रक्षणं सम्यग् राज्ञो धर्मस्य कारणं ।
अरक्षन् नरकं याति तस्माद्रक्ष्याः सदा प्रजाः ॥

सापि गर्दभमारुह्य निजनगरान्निष्काशिता ॥

एतत् कथानकं कथयित्वा विदग्धचूडामणिशुकेनोक्तं । देव ईदृशी नारी भवति ॥

ततस्तौ तु परित्यज्य पक्षिभावमुभावपि ।
दिव्यरूपधरौ भूत्वा जग्मतुस्त्रिदशालयं ॥

एतत् कथानकं कथयित्वा वेतालेनोक्तं । राजन् कयोः कस्याधिकं पापं भविष्यति । राज्ञा विक्रमसेनेनोक्तं ।

निन्द्या योषित एवेह न पुमांसः कदाचन ।

धर्माधर्मविचारेषु नियुक्तास्ते भवन्ति हि ॥

पापमधिकं स्त्रीषु वर्तते पुरुषस्तु विरलपातको भवति ॥ एवं श्रुत्वा गतो वेतालः । तत्र च शिंशिपावृक्षशाखायां अवलम्बितः ॥

इति तृतीयं कथानकं समाप्तं ॥ ३ ॥

---

पुनस्तेन राज्ञा शिंशिपावृक्षान्मृतकं समानीय स्कन्धे धृत्वा यावन्मार्गे चलितं तावद्वेतालेनोक्तं । राजन् श्रूयतां तावत् । कथां कथयामि ॥

अस्ति वर्धमाना नाम नगरी । तत्र राजा शूद्रकदेवः । स च स्थानभूमौ निविष्टः । राज्ञोक्तं । भो प्रतीहार द्वारं शून्यमशून्यं वा । प्रतीहारेणोक्तं ।

प्रस्वेदमलसंश्लिष्टा निरालम्बा निराश्रयाः ।
द्वारि तिष्ठन्ति देवेश सेवका वृषणा इव ॥

अन्यस्मिन् दिवसे दक्षिणापथाद् वीरवरो नाम राजपुत्रः सेवां कर्तुं समायातः । राज्ञा सह दर्शनं जातं । स च राज्ञा पृष्टः । भो राजपुत्र दिनं प्रति तव किं दीयते । वीरवरेणोक्तं । देव प्रतिदिनं सुवर्णं दीयते । राज्ञोक्तं । कियन्तो गजतुरगपदातयः । वीरवरेणोक्तं । देव भार्या सुतो दुहिताहं चत्वार

एव। पञ्चमः खड्गः। अन्यन्नास्ति। तच्छ्रुत्वा सुभट्टा अमात्याश्च सेव्याः समायाताः। राज्ञा चिन्तितं। किमर्थमसौ बहुतरं याचते। अथवा बहु दत्तं कदाचित् सफलं भवति। राजा भाण्डागारिकमाहूय आदेशं दत्तवान्। तस्य वीरवरस्य टङ्कसहस्रसुवर्णं प्रतिदिनं दातव्यं। वीरवरोऽपि देवब्राह्मणभट्टनागरेभ्यपङ्गुदर्शनादीनां दानं दत्वा पञ्च द्रव्याणि गृहीत्वा गृहं समागच्छति। भोजनं विधाय रात्रौ खड्गं गृहीत्वा राजद्वारे प्रहरकं ददाति। एवं नित्यं निशीथसमये यदा राजैवं वदति द्वारे कस्तिष्ठति तदा वीरवरः शब्दं ददाति॥

उक्तं च। एहि गच्छ पतोत्तिष्ठ वद मौनं समाचर।
एवमाशाग्रहग्रस्तैः क्रीडन्ति धनिनोऽर्थिभिः॥
आव्हारयति न स्वस्थो विनिद्रो न प्रबुध्यते।
वत्ति न स्वेच्छया किंचित् सेवकः किंतु जीवति॥
स्वाभिप्रायपरोक्षस्य परचित्तानुवर्तिनः।
स्वयंविक्रीतदेहस्य सेवकस्य कुतः सुखं॥
मौनान्मूकः प्रवचनपटुर्वातुलो जल्पको वा।
क्षान्त्या भीरुर्यदि न सहते प्रायशो नाभिजातः।
धृष्टः पार्श्वे वसति विचरन् दूरगोऽपि प्रमत्तः।

सेवाधर्मः परमगहनो योगिनामप्यगम्यः ॥

अन्यस्मिन् दिने निशीथे श्मशानभूमौ रुदत्या नार्याः करुणविलापशब्दं शृणोति स्म राजा । तं श्रुत्वा राज्ञोक्तं । द्वारे कस्तिष्ठति । वीरवरेणोक्तं । देव वीरवरोऽहं । राज्ञोक्तं । वीरवर रुदत्या नार्याः शब्दं शृणोषि । तेनोक्तं । शृणोमि । राज्ञोक्तं । अस्याः समीपं गत्वा रोदनकारणं विज्ञाय शीघ्रमागच्छ ।

उक्तं च । जानीयात् प्रेषणे भृत्यान् बान्धवान् व्यसनागमे ।
मित्रमापत्तिकाले च भार्यां च विभवक्षये ॥

ततो वीरवरः शब्दानुलग्नः श्मशानभूमिं गतः ।

अलक्ष्येण स्वरूपेण तिमिरव्याप्तवर्त्मना ।
शूद्रकोऽपि महीपालस्तस्य चानुपदं ययौ ॥

तत्र प्रच्छन्नो भूत्वा तत्पृष्ठतो राजापि गतवान् । तत्र च दिव्याभरणभूषिता मुक्तकेशा रुदती नारी दृष्टा ।

नृत्यते कूडते चैव धावते चलते तथा ।
रोदिति चाश्रुहीना च करुणामतिदुःखिता ॥
दुःखिन्यहं पापात्मेति धुनोत्यङ्गं मुहुर्मुहुः ।
आस्फोटयति गात्राणि चोत्पत्य पतते भुवि ॥

तां दृष्ट्वा वीरवरेणोक्तं । का त्वमत्र प्रलापं करोषि । तयोक्तं । अहं राजलक्ष्मीः । वीरवरेणोक्तं । यदि त्वं

राजलक्ष्मीस्तदा केन कारणेन रोदनमारब्धं। तयोक्तं। अस्ति कोऽप्यपायो येन देव्याः प्रकोपः कृतः। तेन तृतीयदिवसे राजायं पञ्चत्वं गमिष्यति। अहं चानाथा भविष्यामि। तेन दुःखेन रोदिमि। वीरवरेणोक्तं। अस्ति को न्वुपायो येन शतायुर्भवति। तयोक्तं। राजकीयभट्टारिकायाः पुरतो यदि त्वं निजपुत्रस्य मस्तकं स्वहस्तेन छित्वा बलिं ददासि तदा राजा शतायुर्भवति। एवं श्रुत्वा वीरवरो निजगृहं गतः। तत्र च तेन प्रसुप्तां भार्यामुत्थाप्य सर्वो वृत्तान्तः कथितः॥ यतः।

ते पुत्रा ये पितुर्भक्ताः स पिता यस्तु पोषकः।
तन्मित्रं यत्र विश्वासः सा भार्या यत्र निर्वृतिः॥

पुत्रो यशस्व्यर्थकरी च विद्या।
अरोगिता मित्रसमागमश्च।
भार्या विनीता प्रियवादिनी च।
शोकस्य मूलोद्धरणानि पञ्च॥

अविनीतः स्वजन एव नृपतिरदाता शठानि मित्राणि
अविनयवती च भार्या मस्तकशूलानि चत्वारि॥

सुहृदि निरन्तरचित्ते गुणवति भृत्ये प्रियासु नारीषु।
स्वामिनि सौहृदयुक्ते निवेद्य दुःखं सुखी भवति॥

किं वक्तव्यमत्र ।

अहं मृत्युवशं प्राप्तो राजार्थे नात्र संशयः ।
पितृमात्राश्रमे भद्रे गच्छ त्वं वरवर्णिनि ॥

एतच्छ्रुत्वा भार्यया भणितं ।

मितं ददाति हि पिता मितं भ्राता मितं सुतः ।
अमितस्य तु दातारं भर्तारं का न पूजयेत् ॥
न च पुत्रेण मे कार्यं स्वजनैर्नापि बान्धवैः ।
न पित्रा नैव मात्रा च त्वं हि स्वामिन् गतिर्मम ॥
न त्यजामि त्वत्समीपमहं स्वामिन् पतिव्रता ।
भर्ता वै ह्याश्रयः स्त्रीणामेष धर्मः सनातनः ॥
न दानैः शुध्यते नारी नोपवासशतैरपि ।
अव्रतापि भवेच्छुद्धा भर्तृतद्गतमानसा ॥
अन्धकं कुब्जकं चैव कुष्ठाङ्गं व्याधिपीडितं ।
आपद्गतं च भर्तारं न त्यजेत् सा महासती ॥
एष धर्मो मयाख्यातो नारीणां चोत्तमा गतिः ।
या नारी कुरुते चान्यत् सा याति नरकं ध्रुवं ॥

एवं श्रुत्वा पुत्रेण भणितं । यदि मम वधेन राजा शतायुर्भवति तर्हि तदा किमन्विष्यते ।

माता यदि विषं दद्यात् पित्रा विक्रीयते सुतः ।
राजा हरति सर्वस्वं शरणं कस्य जायते ॥

दुहित्रापि भणितं। अहमपि शिरो ददामि। अथ चत्वारस्ते पर्यालोच्य भट्टारिकाया भवनं गताः। तत्र राज्ञा प्रछन्नेन भणितं।

सा सा संपद्यते बुद्धिः सा मतिः सा च भावना।
सहायास्तादृशा ज्ञेया यादृशा भवितव्यता॥

वीरवरेण भट्टारिकायाः पुरतो गत्वा पूजां विधाय खड्गमाकृष्य भणितं। देवि भगवति मम पुत्रस्य वधेन राजा शतायुर्भवतु। इत्युदीर्य शिरश्छित्वा पातितं भूमौ। भ्रातरं व्यापादितं दृष्ट्वा भगिन्या निजदेहं त्यक्तं। मात्रापि आत्मा व्यापादितः। वीरवरेण चिन्तितं। त्रयाणामपि मरणं संजातं। राजसेवां कृत्वा कस्य योग्यं सुवर्णसहस्रमेकं ग्रहीष्यामि। छुरिकामाकृष्य निजमस्तकं छित्वा भूतले पातितं। सर्वेषां क्षयं दृष्ट्वा राज्ञा चिन्तितं। ममार्थेऽस्य कुटुम्बस्य क्षयः संजातः। तस्माद्राज्येन किं प्रयोजनं। छुरिकामाकृष्य यावन्निजशिरश्छेदं करोति तावद् देव्या भणितं। पुत्र तुष्टाहं तव साहसेन। इदानीं वरं ब्रूहि। राज्ञोक्तं। देवि भगवति यदि तुष्टासि तदेते चत्वारोऽक्षतशरीरा एव तादृशा भवन्तु। देव्या भणितं। एवं भवतु। पातालादमृ-

तमानीय चत्वारोऽपि जीवापिताः। राजापि प्रसन्नः सन् स्वगृहं जगाम। तेऽपि वीरवरादयः स्वकीयं मन्दिरं गताः। ततः प्रभातसमये राजा सभायामुपविष्टवान्। पुनरपि वीरवरः संप्राप्तः। राज्ञा वीरवरः पृष्टः। भो वीरवर रात्रौ स्त्री रोदनं किमर्थं चकार। वीरवरेणोक्तं।

क्षमी दाता गुणग्राही स्वामी पुण्येन लभ्यते।
नृपरत्नः शुचिर्दक्षः स्वामिन् भृत्योऽपि दुर्लभः॥

ततो राज्ञापि वीरवरस्यार्द्धराज्यं दत्तं। उक्तं च।

सकृज्जल्पन्ति राजानः सकृज्जल्पन्ति साधवः।
सकृत् कन्याः प्रदीयन्ते त्रीण्येतानि सकृत् सकृत्॥

एतत् कथानकं कथयित्वा वेतालेनोक्तं। राजन् कथय। एतेषां मध्ये कः सत्वाधिकः। राज्ञा विक्रमसेनेनोक्तं। राजा सत्वाधिकः। वेतालेनोक्तं। केन कारणेन। राज्ञोक्तं। स्वाम्यर्थे भृत्याः प्राणान् परित्यजन्ति। न तु भृत्यार्थे स्वामी। येन राज्यं तृणवत् कृत्वात्मानं हन्तुमारब्धं अतः कारणाद् राजा सत्वाधिकः। एवं श्रुत्वा गतो वेतालः। गत्वा च पुनरपि शिंशिपावृक्षशाखायामवलम्बितः॥

इति चतुर्थं कथानकं समाप्तं ॥ ४ ॥

अथ पुनस्तेन राज्ञा शिंशिपावृक्षान्मृतकमानीय स्कन्धे धृत्वा यावन्मार्गे प्रचलितं तावद्वेतालेनोक्तं। भो देव श्रूयतां तावत्। कथानकं कथयामि ॥

अस्त्युज्जयिनी नाम पुरी। तत्र राजा महाबलो नाम। तस्य संधिविग्रहविशेषज्ञो हरिदासो नाम प्रधानमन्त्री। तस्य दुहिता महादेवी नाम। सा चातीव रूपवती वरयोग्या वर्तते। पिता वरचिन्तापन्नो बभूव। तयोक्तं। तात यस्य सम्यग्गुणो भवति तस्याहं दातव्या। तस्मिन् प्रस्तावे राज्ञा दक्षिणाधिपतिपार्श्वे पिता प्रहितः। तत्र गत्वा दक्षिणाधिपतिना सह दर्शनं संजातं। राज्ञोक्तं। भो हरिदास पठ किंचित् कलिकालस्वरूपं हि। हरिदासेनोक्तं। देव

कालः संप्रति वर्तते कलियुगे सत्या नरा दुर्लभा।
देशाश्च प्रलयं गताः शलभकैर्लौल्यं गताः पार्थिवाः।
नानाचौरगणा मुषन्ति पृथिवीं मार्गे जनः क्षीयते।
पुत्रस्यापि न विश्वसन्ति पितरः कष्टं युगं वर्तते॥
धर्मः प्रव्रजितः तपः प्रचलितं सत्यं च दूरे गतं।
पृथ्वी मन्दफला नृपाश्च कुटिला लौल्ये स्थिता ब्राह्मणाः।

लोकाः स्त्रीषु रताः स्त्रियो हि चपलाः शास्त्रागमे वैप्लवाः ।
साधुः सीदति दुर्जनः प्रभवति प्रायः प्रविष्टः कलिः ।

तत्रापि हरिदासोऽपि ब्राह्मणेनैकेनागत्य प्रार्थितः । निजदुहिता मम दीयतां । हरिदासेनोक्तं । यस्य सम्यग्गुणा भवन्ति तस्याहं दास्यामि । ब्राह्मणेनोक्तं । तर्हि दर्शयामि । इति तेन हस्ताद् घटितो रथो दर्शितः । एष रथश्चिन्तित आकाशे याति । हरिदासेनोक्तं । प्रभाते रथमादाय मम समीप आगन्तव्यं । ततः प्रभाते रथं गृहीत्वा समायातः । द्वावपि रथारूढावुज्जयिन्यां समायातौ । तत्रापि ज्येष्ठभ्राता ब्राह्मणेनैकेनागत्य प्रार्थितः । निजभगिनी मम दीयतां । भ्रात्रा भणितं । यस्य सम्यग्गुणो भवति तस्याहं दास्यामि । तेनोक्तं । अहं ज्ञानशास्त्रं जानामि । भ्रात्रोक्तं । तर्हि दत्ता मया । अथ केनापि ब्राह्मणेनागत्य माता प्रार्थिता । निजदुहिता मम दीयतां । मात्रोक्तं । यस्य सम्यग्गुणो भवति तस्याहं दास्यामि । तेनोक्तं । अहं धनुर्विद्यां जानामि शब्दवेधी । मात्रोक्तं । तर्हि दत्ता मया । एवं त्रयो वरा दुहितृदानं श्रुत्वा विवादं गताः । एका कन्या

त्रयो वराः। विवादं कुर्वन्ति। किमिदं भविष्यति॥ राज्ञो सा कन्या अतीव रूपिणी केनापि राक्षसेन विन्ध्याद्रौ नीता। यतः।

अतिरूपहृता सीता अतिगर्वेण रावणः।
अतिदानबलिर्बद्ध अति सर्वत्र वर्जयेत्॥

प्रभाते त्रयो वराः समायाताः। तेषां मध्ये ज्ञानी पृष्टः। भो ज्ञानिन् साधु विद्यते। तेन कठिनीमादाय गणितमुक्तं च। सा विन्ध्ये वर्तते राक्षसेन नीता। द्वितीयेन शब्दवेधिनोक्तं। राक्षसं व्यापाद्याहमानयिष्यामि। तृतीयेनोक्तं। मदीये रथ आरुह्य गछ। स रथमारुह्य गतः। तत्र गत्वा राक्षसं व्यापाद्य रथ आरोप्य आनीता सा कन्या। तस्या अर्थे त्रयो वराः परस्परं विवादं कुर्वन्ति। पित्रा चिन्तितं। सर्वे कृतोपकाराः कस्मै दीयते कस्मै न दीयते॥

एतत् कथानकं कथयित्वा वेतालेनोक्तं। राजन् कथय। एतेषां मध्ये कस्य भार्या भवति। विक्रमसेनेनोक्तं। ज्ञानिभार्या भवति। वेतालेनोक्तं। सर्वे समानगुणाः कथं तस्य भार्या भवति। राज्ञा विक्रमसेनेनोक्तं।

उद्यमः साहसं धैर्यं बलं बुद्धिः पराक्रमः ।
षडेते यस्य तिष्ठन्ति तस्माद् देवोऽपि शङ्कितः ॥

एवं श्रुत्वा गतो वेतालः । गत्वा च पुनरपि शिंशिपावृक्षशाखायामवलम्बितः ॥

इति पञ्चमं कथानकं समाप्तं ॥ ५ ॥

---

अथ शुकसप्ततिनामा कथासंग्रहः ॥

प्रणम्य शारदां देवीं दिव्यविज्ञानशालिनीं ।
पालिनीं सर्वभूतानामादिदेव्यै नमो नमः ॥

अस्ति चन्द्रकुलं नाम नगरं । तत्र विक्रमसेनो नाम राजा । तस्य भार्या हरिदत्ता । तयोः सुतो मदननामा । तस्य यौवने सोमदत्तश्रेष्ठिसुता प्रभावती नाम पत्न्यासीत् । सा च अतीव विषयासक्तमनाः । ततस्तत्प्रतिबोधाय श्रेष्ठिमित्रत्रिविक्रमब्राह्मणेनानीतौ गन्धर्वपुत्रौ मालजातिजीवौ शुकशारिकौ पञ्जरस्थौ कृतौ ॥

शुकशारिकोत्पत्तिरेवं ॥

अस्त्यत्र मलयो नाम शिखरी चन्दनाश्रयः ।

तन्निकुञ्जे दिवो भ्रष्टः शुकोऽस्ति गुणसागरः ॥
शारिका च तथा भ्रष्टा हिमवच्छिखराश्रिता ।
प्रवीणा पूर्वशापेन वाग्विनोदपरायणा ॥

एतयोः शापं चेत्थं त्रिविक्रमो ब्राह्मण उवाच । पुराहं खेचरोऽभवं मेरोरुपरि सिद्धाश्रमनिवासी । तत्र सिद्धाश्रमे कल्पद्रुमादि वनं । तत्र च मानसं सरः । तच्च देवगणैः सेवितं । इत्यादि । तत्र पुष्पापीडाख्यौ गन्धर्वौ ऋतुमायथौ । तद्भार्या शालिनी । ताभ्यां नाटककरणं । तत्र नाटके मूर्छनाः ११ ॥ स्वराः ७ ॥ तालाः ४९ ॥ रागाः ६ ॥ रागिण्यः ३० ॥ भाषादिरूपगीतानि च १०८ ॥ नृत्तकरणादौ हंसा मदान्हरणास्थां तत्रायाताः । तत इन्द्रागमनं । तत् तथा च दृष्ट्वा कोपार्दित इन्द्रस्तयोः स्वेच्छावृत्तिं न सहते । तौ शुकशारिकारूपौ भयेन नष्टाविन्द्रशापेन वियुक्तौ एको मलयेऽपरा हिमवति । राजपुत्रस्योपकृतौ शापान्तो भविष्यतीति शापानुग्रहः । ममापि मद्गुरोः शापः । भो ब्राह्मण त्रिविक्रम राजपुत्रोपकृतौ शापान्तः ॥ ततो ब्राह्मणेन त्रिविक्रमेण मलयाचलेन शारिकायुतशुकानयनं कृतं । तयोः पञ्जरे स्थितिः । मदनवासगृहे मोचनं ॥

अथैकदा तेन शुकेन विषयासक्तिनियमाय मदनः प्रोक्तः। श्लाघ्यस्त्वं यदेवं सुखमनुभवसि। यतः।

फलं धर्मस्य विभवो विभवस्य फलं सुखं।
सुखमूलं तु तन्वङ्ग्यो विना ताभिः कुतः सुखं॥

इत्यादि परं तव कामत्वमेवास्ति न धर्मार्थौ। यतः।

कुलमार्गपरः श्रेष्ठः पित्रोः शुश्रूषकः शुचिः।
शास्त्रमार्गानुसारी च धर्मिष्ठो धर्ममाप्नुयात्॥
न्यायवादी स्थिरारम्भः क्षिप्रकारी महोद्यमः।
अदीनोऽकोपनश्चैव नरः श्रीभाजनं भवेत्॥

कामं च त्वं स्वयं वेत्सि। परं कामसेवनं त्वभ्यासासक्तया न युक्तं। यतः पित्रोस्तु इत्यादिश्लोकबन्धमयालंकृतः सप्ततिसंबन्धोऽयमलेखि॥

शुको मदनमुद्दिश्य जल्पति॥

पित्रोस्तु दुःखिनोर्दुःखात् पतत्यश्रुचयो भुवि।
तेन पापेन ते वत्स पतनं देवदर्शन॥

शृणु तावत् कथयामि। अस्ति पद्मपुरं नाम नगरं। तत्र सत्यधर्मा ब्राह्मणः। तस्य भार्या धर्मशीलाभिधा। सुतो देवशर्मा। स च प्राप्तविद्योऽपि मातृपितृतः प्रच्छन्नवृत्त्या विद्यार्थं सिद्धिस्थानं नाम देशान्तरं गतः। तीर्थं च। तेन च तत्र कोपाद्

ब्रह्मतेजसा शिंशिपोपरिस्थितां बलाकां भस्मीकृत्य नारायणद्विजगृहं भिक्षार्थं प्रविष्टं। स्वभर्तृशुश्रूषापरया तत्पत्न्या च कोपाविष्टो निर्भर्त्सितः। सत्यद्विजहन् नाहं बलाकावत् कोपस्थानं। इति श्रुत्वा स प्रहज्ञानाद् भीतो विस्मितश्च। प्रेषितश्च तया धर्मव्याधपार्श्वे वाराणसीं नगरीं ययौ। तत्र मार्गे रक्ताक्तं पमत्रं मांसं विदधानं व्याधं दृष्ट्वा अद्भुरसीमन्ते स्थितः। व्याधेन स्वागतप्रश्नादि विहितं। निजपितरौ सभक्तिकं भोजयित्वा तस्य परमान्नादि भोजनं दत्तं। तदनन्तरं तेन ब्राह्मणेन व्याधः संपृष्टः। कथं सती ज्ञानवती। कथं च त्वं ज्ञानवान्। तेन व्याधेनोक्तं।

द्विजान्वयप्रणीतं यो नित्यं धर्मं निषेवते।
उत्तमाधममध्येषु विचारेष्वपराङ्मुखः॥
स गृही स मुनिः साधुः पितृशुश्रूषकश्च सः।
तेनाहं परिशुश्रूषां यावज्जीवं त्यजामि नो॥

अत एव मम ज्ञानमुत्पन्नमस्ति। त्वं च निजपितरौ परित्यज्य परिभ्रमन् मादृशां न संभाषणार्हः। परं त्वतिथित्वाज् जल्पितः। एवमुक्तः स ब्राह्मणो विनयपरं तं पप्रच्छ। तेनोक्तं।

न पूज्यान् पूजयन्ते ये न मान्यान् मानयन्ति च।

जीवन्ति निन्द्यमानास्ते मृताः स्वर्गं न यान्ति च ॥
अतः। व्याधेन बोधितस्तेन ब्राह्मणः सत्क्रियो गृहे।
अभवत् प्रीतिशोभाढ्यः परतः कीर्तिभाजनं ॥

तस्मात् स्वकुलोद्भवं धर्मं स्मर पित्रोश्च विनयपरो भव। एवं शुकेन प्रतिबोधितः स मदनः पितरौ नमस्कृत्य तदनुज्ञातः।

तेन पुत्रेण वै किं यः पितृदुःखाय वर्तते।
तस्माद्गन्तव्यं ते तात देशेनैव देशान्तरं ॥

कान्ते कथय कथं भविष्यसि त्वं। कथं त्वां विनाहं भविष्यामि इति भार्यां चापृच्छ्य तुरंगमारूढवान्। गतश्च देशान्तरं ॥

पश्चात् तत्पत्नी कतिचिद् दिनानि शोकयुक्ता सती स्वैरिणीभिः सखीभिः प्रतिबोधिता पुरुषान्तराभिलाषुकाभवत्। ततस्ताभिरेवमुक्तं।

कतिपयदिनसंस्थं यौवनं सुनितम्बिनि।
कामं कमलपत्राक्षि भुङ्क्ष्व भोगान् अहर्निशं ॥

स्वपतिमप्राप्यमाणा पुरुषान्तरं भजस्व। यतः। क्षणभङ्गि यौवनं। इत्यादि प्रतिबोध्य पुरुषान्तरं गुणचन्द्रसंज्ञं रमणाय स्वागारं विहाय यावच्चलति तावत् शारिकावदत्। मा गच्छेत्यादिवचनैर्निर्भर्त्सिता।

ततस्तया सा गलमोटनपूर्वं विनाशिता। ततः क्षणं स्थित्वा स्वेष्टदेवतां हृदि स्मृत्वा ताम्बूलादि प्रगृह्य यावच्चलति तावच्छुकः प्राह। सिद्धिरस्तु शिवाः सन्तु तव पन्थानः। क्व गन्तव्यं इत्यादिवाक्यैः पृष्टा। सा च शुकवचने शकुनमिव ज्ञात्वा हृष्टा शुकं प्राह। हे शुक राजजनान्तरास्वादं विज्ञातुं चलितास्मि। शुक उवाच। युक्तमिदं कर्तव्यमेव। परं यदि दुःखं पतति तन्निन्दितं कुलस्त्रीणां। विपरीते पाते सति बुद्धिरस्ति न वा। यदि नास्ति तदा पराभवपदं भविष्यसि॥ यतः।

कौतुकान्वेषिणी नित्यं दुर्जना व्यसनागमे।
मासोपवासिनी यद्वद् वणिक्पुत्रकचग्रहे॥

तच्छ्रुत्वा ससंभ्रमं सा जगाद। किम् इदं भाषितं शुक। इति पप्रच्छ। सा तदा सार्द्धं पांशुलाभिः कृतादरा। स उवाच।

यदि ते कौतुकं सुभ्रु परार्थं गच्छ सुन्दरि।
स्थिरीभूय त्वया पश्चात् श्राव्येयं महती कथा॥

एवं शुकोक्तं श्रुत्वा कौतुकाकुलचेतसा यावत् सा निजगृहे आसीनास्ति तावच्छुकः कथामाह॥

चन्द्रवती पुरी। तत्र भीमो नाम महाराजः। तत्र

च मोहनश्रेष्ठिसुतः सुधनो नाम। स तन्नगरवासिनो हरिदत्तस्य कलत्रं लक्ष्मीनाम्नीं रन्तुं समीहते। ततो मासोपवासिनीं पूर्णानाम्नीं प्रचुरैर्धनमानदानैर् हरिदत्ते नगराद्बहिर्गते सति दूतीत्वेन स प्रेषयामास हरिदत्तस्य गृहे। सापि चाटूक्तिभिर्लक्ष्मीं प्रसन्नां चक्रे। प्रसन्नयाथ तया तथेत्युक्तं। यत् त्वं याचसे तत् करोमि। पूर्णयोक्तं। तर्हि ममाभिमतं नरं भज। तयोक्तं। कुलवधूनां नैतद्युज्यते। परं तु तवाग्रे यत् प्रतिपन्नं तत् करोमि। उक्तं च।

अद्यापि नोज्झति हरः किल कालकूटं।
कूर्मो बिभर्ति धरणीं खलु चात्मपृष्ठे।
अम्भोनिधिर्वहति दुःसहवाडवाग्निं।
अङ्गीकृतं सुकृतिनः परिपालयन्ति॥

तच्छ्रुत्वा हृष्टा पूर्णा। एवमेवैतत्। ततस्तां लक्ष्मीं प्रविधाय प्रदोषे स्वगृहं निनाय। ततो मोहनश्रेष्ठिसुतः कथितवेलोपरि नागतः किंचित्कार्यवैयग्रेण। ततो लक्ष्म्या सकामयोक्तं। अन्यं नरं शीघ्रं समानय। ततः पूर्णया अत्याकुलितमूढ्या तत्पतिरेव समानीतः। स्वभर्तरि समानीते सा किं करोतु। किं गृहं यातु किं वान्यत् किंचित् करोतु। इति

विचारयतु भवती सपरिवारा। तयोक्तं। न जानीमः। त्वमेव कथय। शुक उवाच। यदि न जानासि ततो विपरीते पतिते कथं निर्वक्ष्यसीति। तर्हि श्रूयतां। स आगच्छन्नेव स्वपतिरित्यभिज्ञातः। ततः कचग्राहं प्रगृह्य प्रोक्तः। हे शठ त्वं ममाग्र इति जल्पसि यत् त्वां विना ममान्या वल्लभा नास्ति। अधुना तु मया परीक्षितोऽसि मया ज्ञातश्चेति कोपं चक्रे। स च तां सुकोमलवचनैरनुनीय कष्टेन स्वगृहं निन्ये॥

इति कथां श्रुत्वा शुकेनोक्तां भयविस्मयकारिणीं
पुंश्चलीवृन्दसमायुक्ता प्रसुप्ता सा प्रभावती॥

इति शुकसप्ततिग्रन्थे शुकेन्द्रप्रोक्तं प्रथमं कथानकं॥

---

## अथ श्रीमहाभारते जम्बुकनीतिः॥

धृतराष्ट्र उवाच॥

कथं शान्त्वेन दानेन भेदैर्दण्डेन वा पुनः।
अमित्रः शक्यते हन्तुं तन्मे ब्रूहि यथातथं॥ १॥

कणिक उवाच॥

शृणु राजन् यथा वृत्तं वने निवसतः पुरा।

जम्बुकस्य महाराज नीतिशास्त्रार्थदर्शिनः ॥ २ ॥
अथ कश्चित् कृतप्रज्ञः शृगालः स्वार्थपण्डितः ।
सखिभिर्न्यवसत् सार्द्धं व्याघ्राखुवृकबभ्रुभिः ॥ ३ ॥
ते ऽपश्यन् विपिने तस्मिन् बलिनं मृगयूथपं ।
अशक्ता ग्रहणे तस्य ततो मन्त्रममन्त्रयन् ॥ ४ ॥

जम्बुक उवाच ॥

असकृद्यतितो ह्येष हन्तुं व्याघ्र वने त्वया ।
युवा वै जवसंपन्नो बुद्धिशाली न शक्यते ॥ ५ ॥
मूषिको ऽस्य शयानस्य चरणौ भक्षयत्वयं ।
अथैनं भक्षितैः पादैर्व्याघ्रो गृह्णातु वै ततः ॥ ६ ॥
[ततो वै भक्षयिष्यामः सर्वे मुदितमानसाः ॥]
जम्बुकस्य तु तद्वाक्यं तथा चक्रुः समाहिताः ।
मूषिकभक्षितैः पादैर्मृगं व्याघ्रो ऽवधीत् तदा ॥ ७ ॥
दृष्ट्वैवाचेष्टमानं तु भूमौ मृगकलेवरं ।
स्नात्वागच्छत भद्रं वो रक्षामीत्याह जम्बुकः ॥ ८ ॥
शृगालवचनात् ते ऽपि गताः सर्वे नदीं ततः ।
स चिन्तापरमो भूत्वा तस्थौ तत्रैव जम्बुकः ॥ ९ ॥
अथाजगाम पूर्वं तु स्नात्वा व्याघ्रो महाबलः ।
ददर्श जम्बुकं चैव चिन्ताकुलितमानसं ॥ १० ॥

व्याघ्र उवाच ॥

किं शोचसि महाप्राज्ञ त्वं नो बुद्धिमतां वरः ।
अशित्वा पिशितान्यद्य विहरिष्यामहे वयं ॥ ११ ॥

जम्बुक उवाच ॥

शृणु मे त्वं महाबाहो यद्वाक्यं मूषिकोऽब्रवीत् ।
धिग्बलं मृगराजस्य मयाद्यायं मृगो हतः ॥ १२ ॥
मद्बाहुबलमाश्रित्य तृप्तिमद्य गमिष्यति ।
गर्जमानस्य तस्यैवमतो भक्ष्यं न रोचये ॥ १३ ॥

व्याघ्र उवाच ॥

ब्रवीति यदि स ह्येवं काले ह्यस्मिन् प्रबोधितः ।
स्वबाहुबलमाश्रित्य हनिष्येऽहं वनेचरान् ॥ १४ ॥
खादिष्ये तत्र मांसानि इत्युक्त्वा प्रस्थितो वनं ॥ १५ ॥
एतस्मिन्नेव काले तु मूषिकोऽप्याजगाम ह ।
तमागतमभिप्रेत्य शृगालोऽप्यब्रवीद्वचः ॥ १६ ॥

जम्बुक उवाच ॥

शृणु मूषिक भद्रं ते नकुलो यदिहाब्रवीत् ।
मृगमांसं न खादेयं गरमेतन्न रोचते ॥ १७ ॥
मूषिकं भक्षयिष्यामि तद्भवान् अनुमन्यतां ।
तच्छ्रुत्वा मूषिको वाक्यं संत्रस्तः प्रगतो बिलं ॥ १८ ॥
ततः स्नात्वा स वै तत्र आजगाम वृको नृप ।
तमागतमिदं वाक्यमब्रवीज्जम्बुकस्तदा ॥ १९ ॥

मृगराजो हि संक्रुद्धो न ते साधु भविष्यति।
सकलत्रस्त्विहायाति कुरुष्व यदनन्तरं ॥ २० ॥
एवं संचोदितस्तेन जम्बुकेन तदा वृकः।
ततोऽवलुम्पनं कृत्वा प्रयातः पिशिताशनः ॥ २१ ॥
एतस्मिन्नेव काले तु नकुलोऽप्याजगाम ह।
तमुवाच महाराज नकुलं जम्बुको वने ॥ २२ ॥
स्वबाहुबलमाश्रित्य निर्जितास्तेऽन्यतो गताः।
मम दत्वा नियुद्धं त्वं भुङ्क्ष्व मांसं यथेप्सितं ॥ २३ ॥

नकुल उवाच ॥

मृगराजो वृकश्चैव बुद्धिमान् अपि मूषिकः।
निर्जिता यत् त्वया वीरास्तस्माद्वीरतरो भवान् ॥ २४ ॥
न त्वयाप्युत्सहे योद्धुमित्युक्त्वा सोऽप्यपागमत् ॥ २५ ॥

कणिक उवाच ॥

एवं तेषु प्रयातेषु जम्बुको हृष्टमानसः।
खादति स्म तदा मांसमेकः सन्मन्त्रनिश्चयात् ॥ २६ ॥
एवं समाचरन् नित्यं सुखमेधेत भूपतिः ॥ २७ ॥
भयेन भेदयेद्भीरुं शूरमञ्जलिकर्मणा।
लुब्धमर्थप्रदानेन समं न्यूनं तथौजसा ॥ २८ ॥

इति श्रीमहाभारते आदिपर्वणि जम्बुकनीतिः ॥

## अथ ब्रह्मपुराणे कण्डूपाख्यानं ॥

### व्यास उवाच ॥

तस्मिन् क्षेत्रे मुनिश्रेष्ठाः सर्वसत्त्वसुखावहे ।
धर्मार्थकाममोक्षाणां फलदे पुरुषोत्तमे ॥ १ ॥
कण्डुर्नाम महातेजा ऋषिः परमधार्मिकः ।
सत्यवादी शुचिर्दान्तः सर्वभूतहिते रतः ॥ २ ॥
जितेन्द्रियो जितक्रोधो वेदवेदाङ्गपारगः ।
अवाप परमां सिद्धिमवाप्य पुरुषोत्तमं ॥ ३ ॥
अन्येऽपि तत्र संसिद्धा मुनयः संयतेन्द्रियाः ।
सर्वभूतहिता दान्ता जितक्रोधा विमत्सराः ॥ ४ ॥

### मुनय ऊचुः ॥

कः स कण्डुः कथं नाम जगाम परमां गतिं ।
श्रोतुमिच्छामहे तस्य चरितं ब्रूहि सत्तम ॥ ५ ॥

### व्यास उवाच ॥

शृणुध्वं मुनिशार्दूलाः कथां तस्य मनोरमां ।
प्रवक्ष्यामि समासेन मुनेस्तस्य विचेष्टितं ॥ ६ ॥
प्रसिद्धे गोमतीतीरे विजने सुमनोहरे ।
कन्दमूलफलैः पूर्णे समित्पुष्पकुशैः जलैः ॥ ७ ॥

कारण्डवचक्रहंसैः कूर्मैर्मद्गुभिरेव च ।
एतैश्चान्यैस्तथाकीर्णा समन्ताज्जलचारिभिः ॥ ८ ॥
तत्राश्रमपदं कण्डोर्बभौ वै मुनिसत्तमाः ।
नानाद्रुमलताकीर्णं नानामृगगणान्वितं ॥ ९ ॥
तपस्तेपे मुनिस्तत्र सुमहत् परमाद्भुतं ।
व्रतोपवासैर्नियमैः स्नानमौनसुसंयुतैः ॥ १० ॥
ग्रीष्मे पञ्चतपा भूत्वा वर्षासु सलिलेशयः ।
आर्द्रवासास्तु हेमन्ते तपस्तेपे सदा मुनिः ॥ ११ ॥
दृष्ट्वा तु तपसो वीर्यं मुनेस्तस्य सुविस्मिताः ।
बभूवुर्देवगन्धर्वाः सिद्धविद्याधरास्तथा ॥ १२ ॥
भूमिं तथान्तरीक्षं च दिवं च मुनिसत्तमाः ।
कण्डुः स तापयामास त्रैलोक्यं तपसो वशात् ॥ १३ ॥
अहो तस्य परं धैर्यम् अहो तस्य परं तपः ।
इत्यब्रुवंस्तदा देवा दृष्ट्वा तं तपसि स्थितं ॥ १४ ॥
व्यग्रास्ते मन्त्रयामासुः शक्रेण सहितास्तदा ।
भयात् तस्य समुद्विग्नास्तपोविघ्नमभीप्सवः ॥ १५ ॥
ज्ञात्वा तेषामभिप्रायं शक्रस्त्रिभुवनेश्वरः ।
प्रम्लोचाख्यां वरारोहां रूपयौवनगर्वितां ॥ १६ ॥
सुमध्यमां सुदर्शनां पीनश्रोणिपयोधरां ।
सर्वलक्षणसंपन्नां प्रोवाच बलसूदनः ॥ १७ ॥

शक्र उवाच ॥

प्रम्लोचे गच्छ शीघ्रं त्वं यत्रासौ तप्यते मुनिः ।
विघ्नार्थं तस्य तपसः क्षोभयस्व च तं शुभे ॥ १८ ॥

प्रम्लोचोवाच ॥

तव वाक्यं सुरश्रेष्ठ करोमि सततं प्रभो ।
किंतु भयं ममैवात्र जीवितस्य च संशयः ॥ १९ ॥
बिभेमि तं मुनिश्रेष्ठं ब्रह्मचर्यव्रते स्थितं ।
दीप्ततेजसम् अत्युग्रं ज्वलनार्कसमप्रभं ॥ २० ॥
ज्ञात्वा मां च मुनिः क्रोधाद्विघ्नार्थं समुपागतां ।
कण्डुः परमतेजस्वी शापं दास्यति दुःसहं ॥ २१ ॥
उर्वशी मेनका रम्भा घृताची सुरता तथा ।
विश्वाची सहजन्या च पूर्वचित्तिस्तिलोत्तमा ॥२२॥
अलम्बुषा मिश्रकेशी शशिलेखा च वामना ।
अन्याश्चाप्सरसः सन्ति रूपयौवनगर्विताः ॥ २३ ॥
सुमध्याश्चारुवदनाः पीनोन्नतपयोधराः ।
कामप्रचारकुशलास्तास्तत्र संनियोजय ॥ २४ ॥

व्यास उवाच ॥

तस्यास्तद्वचनं श्रुत्वा पुनराह शचीपतिः ।

शक्र उवाच ॥

तिष्ठन्तु नाम चान्यास्तास्त्वं तत्र कुशला शुभे ॥ २५ ॥

कामं वसन्तं वायुं च सहायार्थं ददामि ते।
तैः सार्द्धं गच्छ सुश्रोणि यत्रास्ते स महामुनिः ॥ २६ ॥

व्यास उवाच ॥

शक्रस्य वचनं श्रुत्वा तदा सा चारुलोचना।
जगामाकाशमार्गेण तैः सार्द्धमाश्रमं मुनेः ॥ २७ ॥
सा गत्वा तत्र रुचिरं ददर्श मुनिसत्तमाः।
मुनिं तं दीप्ततपसमाश्रमस्थमकल्मषं ॥ २८ ॥
अपश्यत् सा वनं रम्यं तैः सार्द्धं नन्दनोपमं।
पुण्यं पद्मवनोपेतं नानामृगगणाकुलं ॥ २९ ॥
सर्वत्र फलभाराढ्यान् सर्वत्र कुसुमोज्ज्वलान्।
अपश्यत् पादपांश्चैव विहंगरुतनादितान् ॥ ३० ॥
आम्रान्आम्रातकान्भव्यान्नारिकेलान्सतिन्दुकान्
चूतान्विल्वांस्तथा रम्यान्पूरकांश्च मनोहरान् ॥ ३१ ॥
शालांस्तालांस्तमालांश्च सप्तपर्णांश्च चम्पकान्।
भल्लातकान् आमलकान् हरीतकीर्विभीतकान् ॥
एतान् अन्यांश्च वृक्षान् वै सापश्यत् पृथुलोचना।
फलिनः पुष्पितान् रम्यान् गन्धावहान् सुकोमलान्
चकोरैः शतपत्रैश्च भृङ्गराजैस्तथा शुकैः।
कोकिलैः कलरवैश्च हारीतैर्जीवजीवकैः ॥ ३४ ॥
प्रियपुत्रैश्चातकैश्च तथान्यैर्विविधैः खगैः।

श्रोत्ररम्यं सुमधुरं कूजद्भिः परिवेष्टितान् ॥ ३५ ॥
सरांसि च मनोज्ञानि प्रसन्नसलिलानि च ।
कुमुदैः पुण्डरीकैश्च आचितानि समन्ततः ॥ ३६ ॥
एवं दृष्ट्वा वनं रम्यं तैः सार्द्धं परमाद्भुतं ।
इन्द्रेण प्रेषिता नेतुं तपस्तस्य महात्मनः ॥ ३७ ॥
प्रोवाच कामं वायुं च वसन्तं च द्विजोत्तमाः ।
कुरुध्वं मम साहाय्यं सर्वे यूयं पृथक् पृथक् ॥ ३८ ॥
एवमुक्ता तदा सा तु तथेत्युक्ता सुरैस्ततः ।
प्रत्युवाचाद्य यास्यामि यत्रासौ संस्थितो मुनिः ॥ ३९ ॥
अद्य तं देहयन्तारं प्रयुक्तेन्द्रियवाजिनं ।
चलच्छास्त्रं चलद्रश्मिं करिष्यामि कुसारथिं ॥ ४० ॥
ब्रह्मा जनार्दनो वापि यदि वा नीललोहितः ।
तथाप्यद्य करिष्यामि कामबाणक्षतान्तरं ॥ ४१ ॥
इत्युक्ता प्रजगामाथ यत्रासौ तिष्ठते मुनिः ।
महातपःप्रभावेण प्रशान्तश्वापदाश्रमे ॥ ४२ ॥
सा पुंस्कोकिलमाधुर्यं नदीतीरे व्यवस्थिता ।
स्तोत्रमल्पास्थिता तस्मिन्नगायत वराप्सराः ॥ ४३ ॥
तावद्वसन्तः सहसा वसन्तमकरोत् तदा ।
कोकिलालापमधुरं काकलीकमनोहरं ॥ ४४ ॥
ववौ गन्धवहश्चैव मलयाद्रिनिकेतनः ।

उच्चावचानि पुष्पाणि पातयन् वै पुनः पुनः ॥ ४५ ॥
पुष्पबाणधरश्चैव गत्वा तस्य समीपतः ।
मुनेः संक्षोभयामास कामस्तदास्य मानसं ॥ ४६ ॥
ततो गीतध्वनिं श्रुत्वा मुनिर्विस्मयमागतः ।
जगाम यत्र सा सुभ्रूः कामबाणप्रपीडितः ॥ ४७ ॥
दृष्ट्वा तामहसद्धृष्टो विस्मयोत्फुल्ललोचनः ।
भ्रष्टोत्तरीयो विकलः पुलकाञ्चितविग्रहः ॥ ४८ ॥

मुनिरुवाच ॥

कासि कस्यासि सुश्रोणि सुभगे चारुहासिनि ।
मनो हरसि मे सुभ्रु ब्रूहि सत्यं सुमध्यमे ॥ ४९ ॥

प्रम्लोचोवाच ॥

तव कर्मकरा चाहं पुष्पार्थं च समागता ।
आदेशं देहि मे क्षिप्रं किं करोमि तवाज्ञया ॥ ५० ॥

व्यास उवाच ॥

श्रुत्वैवं वचनं तस्यास्त्यक्त्वा धैर्यं विमोहितः ।
आदाय हस्ते तां बालां प्रविवेश स्वमाश्रमं ॥ ५१ ॥
ततः कामश्च वायुश्च वसन्तश्च द्विजोत्तमाः ।
जग्मुर्यथागताः सर्वे कृतकृत्यास्त्रिविष्टपं ॥ ५२ ॥
शशंसुश्च हरिं गत्वा तस्यास्तथा विचेष्टितं ।
स्तुत्वा शक्रं ततो देवाः प्रीताः सुमनसोऽभवन् ॥ ५३ ॥

स च कण्डुस्तया सार्द्धं प्रविश्य निजमाश्रमं ।
आत्मनः परमं रूपं चकार मन्मथाकृति ॥ ५४ ॥
रूपयौवनसंपन्नमतीवसुमनोहरं ।
दिव्यालंकारसंयुक्तं वासवाकृतिसंनिभं ॥ ५५ ॥
दिव्यवस्त्रधरं कान्तं दिव्यस्रग्गन्धभूषितं ।
सर्वोपभोगसंपन्नं सहसा तपसो बलात् ॥ ५६ ॥
दृष्ट्वा सा तस्य तद्रूपं परं विस्मयमागता ।
अहोऽस्य तपसो वीर्यमित्युक्त्वा मुदिता बभौ ॥ ५७ ॥
स्नानं संध्यां जपं होमं स्वाध्यायं देवतार्चनं ।
व्रतोपवासनियमं ध्यानं च मुनिसत्तमाः ॥ ५८ ॥
त्यक्त्वा स रेमे मुदितस्तया सार्द्धमहर्निशं ।
मन्मथाविष्टहृदयो न बुबुधे तपःक्षयं ॥ ५९ ॥
संध्यां रात्रिं दिनं पक्षं मासमयनहायने ।
न बुबोध गतं कालं विषयासक्तमानसः ॥ ६० ॥
सा च तं कामविभवैर्विदग्धा रहसि द्विजाः ।
रमयामास सुश्रोणी प्रचारकुशला तदा ॥ ६१ ॥
एवं कण्डुस्तया सार्द्धं वर्षाणामधिकं शतं ।
अतिष्ठन्मुनिशार्दूलो ग्राम्यधर्मरतो मुनिः ॥ ६२ ॥
सा तं प्राह ततो विप्रं गन्तुमिच्छाम्यहं दिवं ।
प्रसीद सुमुखो ब्रह्मन् क्षमाज्ञां दातुमर्हसि ॥ ६३ ॥

तयैवमुक्तः स मुनिस्तस्थावासक्तमानसः ।
दिनानि कतिचिद्भद्रे स्थीयतामित्यभाषत ॥ ६४ ॥
एवमुक्ता ततस्तेन साग्रं वर्षशतं पुनः ।
बुभुजे विषयांस्तन्वी तेन सार्द्धं महात्मना ॥ ६५ ॥
पुनर्गते वर्षशते साधिके सा शुभानना ।
यामीत्याह दिवं ब्रह्मन् प्रणयात् स्मितशोभिनी ॥ ६६ ॥
उक्तस्तयैवं स मुनिरुपगृह्यायतेक्षणां ।
इहास्यतां क्षणं सुभ्रु चिरकालं गमिष्यसि ॥ ६७ ॥
तया प्रणीता सुश्रोणी सह तेनर्षिणा पुनः ।
शतद्वयं किंचिदूनं वर्षाणामन्वतिष्ठत ॥ ६८ ॥
गमनाय महाभागो देवराजनिवेशनं ।
प्रोक्तः प्रोक्तस्तया तन्व्या स्थीयतामित्यभाषत ॥ ६९ ॥
तया सा चारुसर्वाङ्गी दाक्षिण्येन च दक्षिणा ।
प्रोक्ता प्रोक्ता शापभयात् वेपन्ती न जहौ मुनिं ॥ ७० ॥
तया च रमतस्तस्य परमर्षेरहर्निशं ।
नवं नवमभूत् प्रेम मन्मथासक्तचेतसः ॥ ७१ ॥
एकदा तु त्वरायुक्तो निश्चक्रामोटजान्मुनिः ।
निष्क्रान्तमेव कुत्रेति गम्यते प्राह सा शुभा ॥ ७२ ॥
इत्युक्तः स तया प्राह परिवृत्तमहः शुभे ।
संध्योपास्तिं करिष्यामि क्रियालोपोऽन्यथा भवेत् ॥

ततः प्रहस्य मुदिता सा तं प्राह महामुनिं ।
किमद्य सर्वधर्मज्ञ परिवृत्तमहस्तव ॥ ७४ ॥

मुनिरुवाच ॥

प्रातस्त्वमागता भद्रे नदीतीरमिदं शुभं ।
मया दृष्टासि सुश्रोणि प्रविष्टा च ममाश्रमं ॥ ७५ ॥
इयं च वर्तते संध्या परिणाममहो गतं ।
अवहासः किमर्थोऽयं सद्भावः कथ्यतां मम ॥ ७६ ॥

प्रम्लोचोवाच ॥

प्रत्यूषस्यागता ब्रह्मन् सत्यमेतन्न ते मृषा ।
किन्त्वद्य तस्य कालस्य गतान्यब्दशतानि वै ॥ ७७ ॥

व्यास उवाच ॥

ततः स आयुषो विप्रस्तां पप्रच्छायतेक्षणां ।
कथ्यतां भीरु कः कालो गतो मे रमतस्त्वया ॥ ७८ ॥

प्रम्लोचोवाच ॥

सहोत्तराण्यतीतानि नव वर्षशतानि वै ।
मासाश्च षट् तथैव च समतीतं दिनत्रयं ॥ ७९ ॥

मुनिरुवाच ॥

सत्यं भीरु वदस्येतत् परिहासोऽथवा तव ।
दिनमेकमहं मन्ये त्वया सार्द्धमिहोषितं ॥ ८० ॥

प्रम्लोचोवाच ॥

वदिष्याम्यनृतं ब्रह्मन् कथमत्र तवान्तिके ।
विशेषेण च भवता पृष्टा धर्मानुवर्त्तिना ॥ ८१ ॥

व्यास उवाच ॥

निशम्य तद्वचस्तस्याः स मुनिर्द्विजसत्तमाः ।
धिक् त्वामित्यथोवाच विनिन्द्यात्मानमात्मना ॥८२॥

मुनिरुवाच ॥

तपांसि मम नष्टानि व्रतानि मेऽखिलानि च ।
हतो विवेकः केनापि योषिन्मोहाय निर्मिता ॥८३॥
ऊर्मिषट्कातिगं ब्रह्म ज्ञेयमात्मजयेन मे ।
गतिरेषा हृता येन धिक् तं काममहाग्रहं ॥८४॥

व्यास उवाच ॥

विनिन्द्येत्थं स धर्मज्ञः स्वयमात्मानमात्मना ।
तामप्सरसमासीनामिदं वचनमब्रवीत् ॥ ८५ ॥

मुनिरुवाच ॥

गच्छ पापे यथाकामं यत् कार्यं तत् त्वया कृतं ।
देवराजस्य मत्क्षोभं कुर्वन्त्याभावचेष्टितैः ॥ ८६ ॥
न त्वां करोम्यहं भस्म क्रोधतीव्रेण वह्निना ।
कामभोगासक्तमना उषितोऽहं त्वया सह ॥ ८७ ॥
अथवा तव दोषः कः किं वा कुर्यामहं तव ।
ममैव दोषो नितरां येनाहमजितेन्द्रियः ॥ ८८ ॥

यथाशक्ति कृतार्थिन्या कृतो मत्तपसो व्ययः ।
त्वया नियुक्तया देवैर्मम योगबलार्दितैः ॥ ९ ॥

व्यास उवाच ॥

यावदित्थं स विप्रर्षिरब्रवीत् तां सुमध्यमां ।
तावत् स्यन्दत्स्वेदजला सा बभूवातिवेपथुः ॥ १० ॥
प्रवेपमानां सततं स्विन्नगात्रलतां स तां ।
गच्छ गच्छेति स क्रोधादुवाच मुनिसत्तमः ॥ ११ ॥
सा तु निर्भर्त्सिता तेन विनिष्क्रम्य तदाश्रमात् ।
आकाशगामिनी स्वेदं ममार्ज तरुपल्लवैः ॥ १२ ॥
वृक्षाद्वृक्षं ययौ बाला तदग्रारुणपल्लवैः ।
निर्ममार्ज च गात्राणि गलत्स्वेदजलानि च ॥ १३ ॥
ऋषिणा यस्तदा गर्भस्तस्या देहे समाहितः ।
निर्जगाम सरोमा स स्वेदरूपात् तदङ्गतः ॥ १४ ॥
सोऽथाप्यायितो गोभिः शतधा ववृधे शनैः ।
मारिषा नाम कन्याभूद्वृक्षाणां चारुलोचना ॥ १५ ॥
अथ कालेन महता प्रवृद्धा सा शुभानना ।
प्रचेतसानां सा भार्या दक्षस्य जननी द्विजाः ॥ १६ ॥

इति श्रीब्रह्मपुराणे गौतमीमाहात्म्ये स्वयंभ्वृषि-
संवादे कण्डूपाख्यानं ॥

अथ

## ऋतुसंहारे निदाघवर्णना ॥

प्रचण्डसूर्यः स्पृहणीयचन्द्रमाः ।
सदावगाहक्षतवारिसंचयः ।
दिनान्तरम्योऽभ्युपशान्तमन्मथो ।
निदाघकालः समुपागतः प्रिये ॥ १ ॥
निशाः शशाङ्कक्षतनीलराजयः ।
क्वचिद्विचित्रं जलयन्त्रमन्दिरं ।
मणिप्रकाराः सरसं च चन्दनं ।
शुचौ प्रिये यान्ति जनस्य सेव्यतां ॥ २ ॥
सुवासितं हर्म्यतलं मनोरमं ।
प्रियामुखोच्छ्वासविकम्पितं मधु ।
सुतन्त्रि गीतं मदनस्य दीपनं ।
शुचौ निशीथेऽनुभवन्ति कामिनः ॥ ३ ॥
नितम्बविम्बैः सुदुकूलमेखलैः ।
स्तनैः सहाराभरणैः सचन्दनैः ।
शिरोरुहैः स्नानकषायवासितैः ।
स्त्रियो निदाघं शमयन्ति कामिनां ॥ ४ ॥

नितान्तलाक्षारसरागलोहितैर् ।
नितम्बिनीनां चरणैः सनूपुरैः ।
पदे पदे हंसरुतानुकारिभिर् ।
जनस्य चित्तं क्रियते समन्मथं ॥ ५ ॥

पयोधराश्चन्दनपङ्कशीतलास् ।
तुषारगौरार्पितहारशेखराः ।
नितम्बदेशाश्च सहेममेखलाः ।
प्रकुर्वते कस्य मनो न सोत्सुकं ॥ ६ ॥

समुद्गतस्वेदचिताङ्गसन्धयो ।
विमुच्य वासांसि गुरूणि सांप्रतं ।
स्तनेषु तन्वंशुकमुन्नतस्तना ।
निवेशयन्ते प्रमदाः सयौवनाः ॥ ७ ॥

सचन्दनाम्बुव्यजनोद्भवानिलैः ।
सहारयष्टिस्तनमण्डलार्पणैः ।
सवल्लकीकाकलिगीतनिःस्वनैः ।
प्रबुध्यते सुप्त इवाद्य मन्मथः ॥ ८ ॥

सितेषु हर्म्येषु निशासु योषितां ।
सुखप्रसुप्तानि मुखानि चन्द्रमाः ।
विलोक्य निर्यन्त्रणमुत्सुकश्चिरं ।
निशाक्षये याति ह्रियेव पाण्डुतां ॥ ९ ॥

असह्यवातोद्धतरेणुमण्डला ।
प्रचण्डसूर्यातपतापिता मही ।
न शक्यते द्रष्टुमपि प्रवासिभिः ।
प्रियावियोगानलदग्धमानसैः ॥ १० ॥
मृगाः प्रचण्डातपतापिता भृशं ।
तृषा महत्या परिशुष्कतालवः ।
वनान्तरे तोयमिति प्रधाविता ।
निरीक्ष्य भिन्नाञ्जनसन्निभं नभः ॥ ११ ॥
सविभ्रमैः सस्मितजिह्मवीक्षितैर् ।
विलासवत्यो मनसि प्रसङ्गिनां ।
अनङ्गसंदीपनमाशु कुर्वते ।
यथा प्रदोषाः शशिचारुभूषणाः ॥ १२ ॥
रवेर्मयूखैरभितापितो भृशं ।
विदह्यमानः पथि तप्तपांशुभिः ।
अवाक्फणो जिह्मगतिः श्वसन् मुहुः ।
फणी मयूरस्य तले निषीदति ॥ १३ ॥
तृषा महत्या हतविक्रमोद्यमः ।
श्वसन् मुहुर्दूरविदारिताननः ।
न हन्त्यदूरेऽपि गजान् मृगाधिपो ।
विलोलजिह्वश्चलिताग्रकेशरः ॥ १४ ॥

विशुष्ककण्ठोद्गतशीकराम्भसो ।
गभस्तिभिर्भानुमतोऽभितापिताः ।
प्रवृद्धतृष्णोपहता जलार्थिनो ।
न दन्तिनः केशरिणोऽपि विभ्यति ॥ १५ ॥
हुताग्निकल्पैः सवितुर्मरीचिभिः ।
कलापिनः क्लान्तशरीरचेतसः ।
न भोगिनं घ्नन्ति समीपवर्त्तिनं ।
कलापचक्रेषु निवेशिताननं ॥ १६ ॥
सभद्रमुस्तं परिपाण्डुकर्द्दमं ।
सरः खनन्नायतपोत्रमण्डलैः ।
प्रदीप्तभासा रविणाभितापितो ।
वराहयूथो विशतीव भूतलं ॥ १७ ॥
विवस्वता तीक्ष्णतरांशुमालिना ।
सपङ्कतोयात् सरसोऽभितापितः ।
उत्प्लुत्य भेकस्तृषितस्य भोगिनः ।
फणातपत्रस्य तले निषीदति ॥ १८ ॥
समुद्धृताशेषमृणालजालकं ।
विखिन्नमीनं द्रुतभीतसारसं ।
परस्परोत्पीडनसंहतैर्गजैः ।
कृतं सरः सान्द्रविमर्द्दकर्द्दमं ॥ १९ ॥

रविप्रभोद्भिन्नशिरोमणिप्रभो ।
विलोलजिह्वाद्वयपीतमारुतः ।
विषाग्निसूर्यातपतापितः फणी ।
न हन्ति मण्डूककुलं तृषाकुलः ॥ २० ॥
सफेनलालावृतवक्त्रसंपुटं ।
विनिर्गतालोहितजिह्वमुन्मुखं ।
तृषाकुलं निःसृतमद्रिगह्वराद् ।
गवेषमाणं महिषीकुलं जलं ॥ २१ ॥
पटुतरवनदाहोत्प्लुष्टशस्पप्ररोहाः ।
परुषपवनवेगोत्क्षिप्तसंशुष्कपर्णाः ।
दिनकरपरितापात् क्षीणतोयाः समन्ताद् ।
विदधति भयमुच्चैर्वीक्ष्यमाणा वनान्ताः ॥ २२ ॥
श्वसिति विहगवृन्दः शीर्णपर्णद्रुमस्थः ।
कपिकुलमुपयाति क्लान्तमद्रेर्निकुञ्जं ।
भ्रमति गवययूथः सर्वतस्तोयमिच्छन् ।
शरभकुलमजिह्मं प्रोद्धरेदम्बु कूपात् ॥ २३ ॥
विकचनवकुसुम्भस्वच्छसिन्दूरभासा ।
प्रवणपवनवेगोद्भूतवेगेन तूर्णं ।
तरुविटपलताग्रालिङ्गनव्याकुलेन ।
दिशि दिशि परिदग्धा भूमयः पावकेन ॥ २४ ॥

ध्वनति पवनविद्धः पर्वतानां दरीषु ।
स्फुटति पटुनिनादः शुष्कवंशस्थलीषु ।
प्रसरति तृणमध्ये लब्धवृद्धिः क्षणेन ।
क्षपयति मृगयूथं प्रान्तलग्नो दवाग्निः ॥ २५ ॥
बहुतर इव जातः शाल्मलीनां वनेषु ।
स्फुटति कनकगौरः कोटरेषु द्रुमाणां ।
परिणतदलशाखादुत्पतत्याशु वृक्षाद् ।
भ्रमति पवनधूतः सर्वशोऽग्निर्वनान्ते ॥ २६ ॥
गजगवयमृगेन्द्रा वह्निसंतप्तदेहाः ।
सुहृद इव समेता द्वन्द्वभावं विहाय ।
हुतवहपरिखेदादाशु निर्गत्य कक्षाद् ।
विपुलपुलिनदेशां निम्नगाम् आश्रयन्ते ॥ २७ ॥
कमलवनचिताम्बुः पाटलामोदरम्यः ।
सुखसलिलनिषेकः सेव्यचन्द्रांशुजालः ।
व्रजतु तव निदाघः कामिनीभिः समेतो ।
निशि सुललितगीतैर्हर्म्यपृष्ठे सुखेन ॥ २८ ॥

इति श्रीकालिदासकृतावृतुसंहारे निदाघवर्णना
समाप्ता ॥ १ ॥

## ॥ अथ धूर्तसमागमः ॥

॥ प्रस्तावना ॥

दर्पादम्भोजजन्मप्रभृतिदिविपदां संसदि प्रीतिमत्या ।
स्वश्र्वा मौलौ पुरारेर्दुहितृपरिणये साक्षतं चुम्ब्यमाने ।
तद्वक्त्रं मौलिवक्त्रे मिलितमिति भृशं वीक्ष्य चन्द्रः सहासः
दृष्ट्वा तद्वक्त्रमाशु स्मितशुभगमुखः पातु वः पञ्चवक्त्रः ॥

अपि च ॥

वक्त्राम्भोरुहि विस्मिताः स्तवकिता वक्षोरुहि स्फारिता
श्रोणीसीमनि गुम्फिताश्चरणयोरक्षणोः पुनर्विस्तृताः
पार्वत्याः प्रतिगात्रचित्रगतयस्तन्वन्तु भद्राणि वः ।
विद्धस्यातिकपुष्पसायकशरैरीशस्य दृग्भक्तयः ॥

नान्यन्ते सूत्रधारः ॥

पद्य

नानायोधनिरुद्धनिर्जितसुरत्राणात्रसद्वादिनी- ।
नृत्यद्भीमकबन्धमेलकदलद्भूमिभ्रमद्भूधरः ।
अस्ति श्रीनरसिंहदेवनृपतिः कर्णाटचूडामणि- ।
दृप्यत्पार्थिवसार्थमौलिमुकुटन्यस्ताङ्घ्रिपङ्केरुहः ॥

तस्योत्तुङ्गभुजप्रतापदहनज्वालानिरस्तापदो ।
राज्ञः सर्वगुणानुवादपदवीविद्योतनाचार्यकः ।
यो धीरेश्वरवंशमौलिमुकुटो दातावदाताशयस्-।
तस्य श्रीकविशेखरस्य कविता मच्चित्तमालम्बते ॥

तदनेन सकलसंगीतविशेषविद्योतनाभिनवभरतेन पुरमथनपदारविन्दद्वन्द्ववन्दारुकरपल्लवेन निखिलभाषोपभाषाशुभंभावुकसरस्वतीकण्ठाभरणेन अनवरतसोमरसास्वादकशायकण्ठकन्दलीनरीनृत्यमानमीमांसामहोत्सवेन रामेश्वरस्य पौत्रेण तत्रभवतः पवित्रकीर्तिर्धीरेश्वरस्यात्मजेन महाशासनश्रेणिशिखरग्रामतल्लीजन्मभूमिना कविशेखराचार्यज्योतिरीश्वरेण निजकुतूहलविरचितं धूर्तसमागमनाम प्रहसनमभिनेतुमादिष्टोऽस्मि । तस्य चादिष्टमवश्यमिदं मालतीमालेव मया शिरोधरणीयं ॥ तथा हि

कर्पूरन्ति सुधाद्रवन्ति कमलाहासन्ति हंसन्ति च ।
प्रालेयन्ति हिमालयन्ति करकासारन्ति हारन्ति च ।
त्रैलोक्याङ्गनरङ्गलङ्घिमगतिप्रागल्भ्यसंभाविताः ।
शीतांशोः किरणच्छटा इव जयन्त्येतर्हि तत्कीर्तयः ॥

अपि च ।

के नार्चिता दिविषदः कति न द्विजेशाः ।

संतर्पिता न कवयः कति पूजिता वा ।
के चार्थिनः प्रतिदिनं न कृताः कृतार्थास् ।
त्यागप्रसादपटुना कविशेखरेण ॥
तत् प्रेयसीमाहूय संगीतकमवतरामि ॥

नेपथ्याभिमुखमवलोक्य

आर्ये इतस्तावत् ।

प्रविश्य नटी ॥

अज्ज एसम्हि । आणवेदु अज्जो । को णिओओ पसाईकरीअदुत्ति ॥ *)

॥ सूत्रधारः ॥

आर्ये अपि न जानासि
यश्चत्वारि शतानि बन्धघटनालंकारभाञ्जि द्रुतं ।
श्लोकानां विदधाति कौतुकवशादेकाह्नमात्रे कविः ।
ख्यातः क्ष्मातलमण्डलेष्वपि चतुःषष्टेः कलाया निधिः ।
संगीतागमसागरो विजयते श्रीज्योतिरीशः कृती ॥
तद्विरचितं धूर्तसमागमनाम प्रहसनमभिनेतुमारब्धमिति गीयतां नाट्योचितं किंचित् ॥

॥ नटी ॥ सविनयं

---

*) आर्य एषास्मि । आज्ञापयत्वार्यः । को नियोगः प्रसादीक्रियतां इति ।

आणवेदु अज्जो को एत्थ पबन्धे पहाणो रसो जं उद्दिसिअ गाइस्सं ॥ *)

॥ सूत्रधारः ॥

ननु प्रोत्फुल्लमालतीमकरन्दसान्द्रामोदमत्तमधुकरझङ्कारमुखरो वसन्तः संततोज्जृम्भितानङ्गशृङ्गार एव। तथा हि

विकसितनवमल्लीकुञ्जगुञ्जद्द्विरेफः।
कुसुमितसहकारश्रेणिनिर्यत्परागः।
प्रमुदितपिककण्ठप्रोच्छलन्मङ्गलश्रीर्-।
अपहरति मुनेरप्येष चेतो वसन्तः ॥

॥ नटी ॥

मलआणिलचालिअचूअवणो।
कलकण्ठसराहिदकामिअणो।
मअरन्दविमत्तसिलीमुहओ।
सुरहीकिदसव्वदिसामुहओ।
एसो वसन्तमासो मुणिअणसत्थस्स राअरहिदस्स।
उम्मूलिअ गरुधीरं करेइ वम्महवसं हिअअं ॥ **)

इति। गीयते नेपथ्ये

---

*) आज्ञपयत्वार्यः कोऽस्मिन् प्रबन्धे प्रधानरसो यमुद्दिश्य गास्यामि।

**) मलयानिलचालितचूतवनः। कलकण्ठस्वराहूतकामिजनः। मकरन्द-विमत्तशिलीमुखकः। सुरभीकृतसर्वदिशामुखकः। एष वसन्तमासो

दण्डकमण्डलुमण्डितहस्तः ।
सुललिततिलकविभूषितमस्तः ।
अयमुपसर्पति जङ्गमलोभश्च- ।
चलकाशायपटार्पितशोभः ॥

अज्ज को एसो परिक्खलन्तणिद्धोअकसाअवसणो दण्डकुण्डिआहत्थो धुत्तो विअ इदो तदो विलोएन्तो दीसदि ॥ *)

॥ सूत्रधारः ॥

आर्ये। यः श्रूयते जनमुखात् तुरगक्रियावान् ।
आचारधर्मरहितो गणिकाविलासी ।
दीर्घोर्ध्वपुण्ड्रककमण्डलुदण्डलक्ष्यः ।
पुष्णाति विश्वनगरः किल दम्भमुग्रं ॥

तदेतस्य दर्शनं दूरत एवाहरणीयं ॥

इति निष्क्रान्तौ

॥ इति प्रस्तावना ॥

---

मुनिजनसार्थस्य रागरहितस्य। उन्मूल्य सुधैर्यं करोति मन्मथवशं हृदयं ॥

*) आर्य क एष परिस्खलन्निर्धौतकषायवसनो दण्डकुण्डिकाहस्तो धूर्त इव इतस्ततो विलोकयन् दृश्यते ॥

ततः प्रविशति यथानिर्दिष्टः स्नातकेनानुगम्यमानो विश्वनगरः ॥

॥ विश्वनगरः ॥ सनिर्वेदः।

हृदयकमलमध्ये निर्गुणो निष्प्रपञ्चस् ।
त्रिभुवनपतिरेको ध्यायते योगिभिर्यः ।
तमहमजरमाद्यं ज्ञानमात्रैकवेद्यं ।
मधुमथनमुदारं संततं चिन्तयामि ॥

॥ स्नातकः ॥

समन्तादवलोक्य स्वगतं

*) अहो रमणीअदा वसन्तस्स। जदो
उम्मीलन्तं पसूणं रइरसकुसला छप्पदा वम्महन्धा।
कन्तारङ्गाणुरत्ता महुरसभविअं साणुराअं पिवन्ति।
उग्गाअन्ति प्फुरन्ता तिहुअणजइणो कामराअस्स कित्तिं।
संवित्तिं हारअन्ता पिअअणविरहे कोइला कामिणीणं
अवि अ। **)
जे कप्पूरं हरन्ता कमलवणसिरिं लोलअन्ता सहावं।
साहाओ कम्पअन्ता णिहुअणसुहआ चन्दणाणं वणाणं।

*) अहो रमणीयता वसन्तस्य। यतः। उन्मीलत्प्रसूनं रतिरसकुशलाः षट्पदा मन्मथान्धाः। कान्तारङ्गानुरक्ता मधुरसभवितं सानुरागं पिबन्ति। उद्गायन्ति स्फुरन्तस्त्रिभुवनजयिनः कामरागस्य कीर्तिं। संवित्तिं हारयन्तः प्रियजनविरहे कोकिलाः कामिनीनां ॥

**) अपि च। ये कर्पूरं हरन्तः कमलवनश्रियं लोडयन्तः स्वभावं। शाखाः कम्पयन्तो निधुवनसुखदाश्चन्दनानां वनानां। ते कन्दर्पस्य मित्राणि

ते कन्दप्पस्स मित्ता रदितणुरमणीकेलिदप्पं कुणन्ता।
तेल्लोक्कं मोहअन्ता मलअसिहरिणो सीअला वान्ति वाआ।
ता कधं एसो अइदूसहो वसन्तसमओ मए एक्कसरीरेण सहिदव्वो ॥

इति वैमनस्यं नाटयति

॥ विश्वनगरः ॥

स्नातकं निर्वर्ण्य

अये दुराचार कथमद्य चिन्ताभारनतकन्धरोऽन्यादृश इव दृश्यसे। तथा हि

निःश्वासे पीवरत्वं वपुषि सुतनुता शून्यता दृष्टिपाते।
वक्त्रेन्दौ धूसरत्वं गतिषु विधुरता चेतसि म्लानता च।
चेष्टा नैवेक्ष्यते ते यदधिकविकलं रूपमासादितस्त्वं।
तन्मन्ये पञ्चबाणस्तिरयति भवतो धीरतां पूर्वरूपां॥

॥ स्नातकः ॥

सलज्जमधोमुखः स्थित्वा

*)भअवं अदिलज्जाकरं क्खु एदं। ता ण जुत्तं तुम्ह पुरदो पआसिदुं ॥

---

रतितनुरमणीकेलिदर्पं कुर्वन्तः। त्रैलोक्यं मोहयन्तो मलयशिखरिणः शीतला वान्ति वाताः॥ तत् कथं एष अतिदुःसहो वसन्तसमयो मया एकशरीरेण सोढव्यः।

*) भगवन्नतिलज्जाकरं खलु एतत्। तन्न युक्तं युष्माकं पुरतः प्रकाशयितुं।

॥ विश्वनगरः ॥

न दोषः स्वरूपाख्याने। तत् कथ्यतां॥

॥ स्नातकः ॥ सप्रणामं

*) भअवं अज्ज मए महापहादे णअरपोक्खरिणीपरिसरे उवहसिदसुरणाअरीरूवसंपत्ती अणङ्गसेणा णाम वारविलासिणी विलोइदा। तदो पहुदि सव्वगदं तं ज्जेव पेक्खामि॥

॥ विश्वनगरः ॥

सहस्ततालमुच्चैर्विहस्य

वत्स अद्य मयापि तत्रैव सुरतप्रिया नाम मासोपवासिनी दृष्टा। तामनुसंदधानोऽहमपि मर्मभेदिना कामबाणेन संदलित एव। तथा हि

आकाशे लिखितेव दिक्षु खचितेवाकीर्णरूपेव च।
दृक्पद्मप्रतिबिम्बितेव मनसि श्लिष्टेव बद्धेव च।
सा मच्चित्तसरोरुहे मधुकरीवात्यन्तभावोत्तरा।
कान्ता कान्तविलासवासवसतिः क्वास्तीति न ज्ञायते॥

ऊर्द्ध्वमवलोक्य

वत्स मध्याह्नमारूढो भगवान् सहस्रांशुः। तथा हि

---

*) भगवन्नद्य मया महाप्रभाते नगरपुष्करिणीपरिसरे उपहसितसुरनागरीरूपसंपत्तिरनङ्गसेना नाम वारविलासिनी विलोकिता। ततः प्रभृति सर्वगतां तामेव प्रेक्षे॥

दिक्चक्रं मृगतृष्णया कवलितं व्योमापि भास्वत्कर-।
छायाभिःस्फुरितं तुषानलकणप्रायाश्च भूरेणवः।
पान्थाः पल्वलसंकुलद्रुमलताकुञ्जोदरे शेरते।
मज्जत्कुञ्जरपानलोडितजलाः क्षुभ्यन्ति तोयाशयाः॥
तद्भिक्षाकरणार्थमत्रैव कमपि गृहमेधिनमनुसराव॥

इति परिक्रामतः

॥ स्नातकः ॥

अग्रतोऽवलोक्य

*)भो भअवं पेक्ख पेक्ख विहिदभअवन्तजणमुण्डसरिच्छवङ्कुअरमहिसीखम्भसोहन्तचउस्सालं इदोतदोसंचरन्तबालगोवच्छसोहिदं पीणुत्तुङ्गत्थणालसपरिक्खलन्तमन्दसंचाररमणिज्जावासपरिसरसंचरन्तचेलिआसमूहं कस्स बि महाधणस्स वासभअणं विलोईअदि। **) भो भो णाअरा कस्स इदं वासभअणं॥

इति पठति। नेपथ्ये

लक्ष्मीविवर्तरसविघ्नितसर्वभोगः।
शश्वत्प्रकीर्णधनचिन्तितवीतनिद्रः।

---

*) भो भगवन् प्रेक्षस्व प्रेक्षस्व। विहितभगवज्जनमुण्डनादृशप्रचुरतरमहिषीस्तम्भशोभमानचतुःशालं इतस्ततःसंचरद्बालगोवत्सशोभितं पीनोत्तुङ्गस्तनालसपरिस्खलन्मन्दसंचाररमणीयावासपरिसरसंचरच्चेटिकासमूहं कस्यापि महाधनस्य वासभवनं विलोक्यते॥

**) भो भो नागराः कस्येदं वासभवनं।

अग्राह्यनामकतया भुवि यः प्रसिद्धस्
तस्यैतदाश्रमपदं पुरतो विभाति ॥

॥ स्नातकः ॥

अग्रतो गत्वा पुनः

भो भो णाअरा कस्स इदं वासभअणं ॥

इति पठति। पुनर्नेपथ्ये लक्ष्मीत्यादि

॥ विश्वनगरः ॥

आः क एष नामग्रहणे भवतो निर्बन्धः। अथवा यद्वा तद्वास्तु श्रूयतां। मृताङ्गारठक्कुरस्याश्रमोऽयं। वत्स अलं विलम्बेन। वासाभ्यन्तरं प्रविशाव ॥

इत्यावासप्रवेशं नाटयित्वा एकान्ते स्थितौ। ततः प्रविशति कश्मलवेशो मृताङ्गारः

॥ मृताङ्गारः ॥

व्ययशीलः कुबेरोऽपि कामं याति दरिद्रतां।
अपि प्राणाः प्रदातव्या नार्थिभ्यो धनिकैर्धनं ॥

॥ स्नातकः ॥ उपसृत्य

*)भो महाबम्हण भअवन्तो विस्सणाअरचरणा तुम्हाणं गेहे भिक्खं भुञ्जिदुं इच्छन्ति ॥

॥ मृताङ्गारः ॥ स्वगतं

अहो दुर्दैवमस्माकं यदेतान् सकलनगरीयाप्यलोकान्

*) भो महाब्राह्मण भगवन्तो विश्वनगरचरणा युष्माकं गेहे भिक्षां भोक्तुमिच्छन्ति ॥

विहाय मय्येव पतितो धूमकेतुः। तत् कः प्रतीकारो ऽत्र भविष्यति ॥

इति विचिन्त्य तावत् प्रकाशं सविनयं

स्थाने यस्य चरन्ति भैक्ष्यमनघाः स्नेहेन युष्मादृशः।
स स्यादच्युतमूर्तिसेवनवशाद्धन्यः पवित्रालयः।
किंत्वस्मत्प्रतिवेशिविप्रवनिता भ्रातृप्रसक्ताङ्गना।
दूती सप्रसवेति सूतकमतः स्थानान्तरं गम्यतां॥

॥ विश्वनगरः ॥ स्वगतं

अहो दुरात्मनोऽस्य व्याजव्यवहारः। भवतु वा। तत् प्रबोधयामि।

प्रकाशं

आयुष्मन् यतीनामस्माकं कुतः सूतकदोषः। तथा च स्मृतिः

न वायुः स्पर्शदोषेण नाग्निर्दहनकर्मणा।
नापो मूत्रपुरीषाभ्यां नान्नदोषेण मस्करी॥

॥ मृताङ्गारः ॥ सविनयं

भगवन् यद्यप्येवं तथापि न संभवति। पश्य

अनावृष्ट्या कृषिर्नष्टा राष्ट्रभङ्गाद्रणादिकं।
वाणिज्यमल्पलाभेन प्रातराशस्य का कथा॥

॥ स्नातकः ॥ सक्रोधं संस्कृतमाश्रित्य

धिङ् मौर्ख्यं जलधिसुतायाः श्रियः।
नो जानाति कुलीनमुत्तमगुणं सत्त्वान्वितं धार्मिकं।
नाचारप्रवणं न कार्यकुशलं न प्रज्ञयालंकृतं।
नीचं क्रूरमपेतसत्त्वहृदयं यस्मादियं सेवते।
तत् त्वं सानुगुणः पयोधिसुतया लक्ष्म्या प्रमाणीकृतः॥

*) अरे णट्ठपरलोअ दुट्ठबम्हणा ईदिसे दूसहमज्झण्हे पढमं तुमं महाधणं भिक्खिअ कुदो अण्णदो गदुअ अम्हेहिं भिक्खा पत्थिदव्वा।

॥ मृताङ्गारः ॥

भगवन्नस्मदावासोत्तरे सुरतप्रिया नाम मासोपवासिनी प्रतिवसति। तत्र गम्यतां॥

इत्यभिधाय सत्वरं परिक्रान्तः

॥ विश्वनगरः ॥

यद्येवं ततः समीहितमेव नः संपन्नं। तदेहि तत्रैव गच्छाव॥

इति परिक्रामतः ॥ स्नातकः ॥ पुरोऽवलोक्य गन्धमाघ्राय

**) भअवं पेक्ख पेक्ख एकाङ्गिआमुत्थमेत्तिअआ-

---

*) अरे नष्टपरलोक दुष्टब्राह्मण ईदृशे दुःसहमध्याह्ने प्रथमं त्वां महाधनं भिक्षित्वा कुतोऽन्यतो गत्वा अस्माभिर्भिक्षा प्रार्थयितव्या॥

**) भगवन् प्रेक्षस्व प्रेक्षस्व एकाकिकामुत्तमात्रिमात्रसंयुक्तमहाकन्दकुण्डपरिमलोद्गारोऽग्निमभ्रनादेनां सेवते। तदेतदेव सुरतप्रियाया आयतनं॥

संजुत्तमहाकन्दकुट्ठपरिमलुग्गारो अग्गिमभवणादो णं सेवदि। ता एदं ज्जेव सुरतप्पिआए वासभवणं॥

॥ विश्वनगरः ॥

विदग्धेव किल मासोपवासिनीति किंवदन्ती। तदागच्छोपसर्पाव॥

इत्येकान्ते स्थितौ। ततः प्रविशति सुरतप्रिया

॥ सुरतप्रिया ॥

*) धम्मो ण इट्ठो वहुदुक्खचेट्ठो।
मोक्खेण सोक्खं मम अत्थि सच्चं।
अत्थो समत्थो सअलं विधादुं।
अणङ्गसव्वस्सकलाणिहाणं॥

॥ स्नातकः ॥ उपसृत्य

**) अज्जे विस्सणअरो तुम्हाणं अदिधी उअत्थिदो॥

॥ सुरतप्रिया ॥ परिक्रम्यावलोक्य च

***) ता उअसप्पामि। उपसृत्य। भअवं पणमामि॥

॥ विश्वनगरः ॥ सप्रमोदं

मदभिलसितभाजनं भूयाः॥

---

*) धर्मो न इष्टो बहुदुःखचेष्टो मोक्षेण सौख्यं ममास्ति सत्यं। अर्थः समर्थः सकलं विधातुं अनङ्गसर्वस्वकलानिधानं॥

**) आर्ये विश्वनगरो युष्माकमतिथिरुपस्थितः॥

***) तदुपसर्पामि। भगवन् प्रणमामि।

॥ सुरतप्रिया ॥

*) भअवं तुम्हाणं पसादेण॥

॥ विश्वनगरः ॥

एवमचिरादस्तु॥

॥ सुरतप्रिया ॥

**) आणवेदु भअवं जं मए कादव्वं दाअव्वं च॥

॥ विश्वनगरः ॥

शुभे किमदेयमस्माकं भवत्या। सांप्रतं भिक्षैव तावत्॥

॥ सुरतप्रिया ॥

***) भअवं कीदिसी भिक्खा कीदिसीए वेलाए केत्तिआइं ते अण्णाइं॥

॥ विश्वनगरः ॥ सहर्षं

श्रूयतां।
मांसं माषपटोलतक्रवटिकावास्तूकशाकं वटः।
संजीवन्यथ मत्स्यमुद्गविदलप्रायः प्रकारोत्करः।
स्वादिष्ठं च पयो घृतं दधि नवं रम्भाफलं शर्करा।
संक्षेपादिति साध्यतां सुवदने भिक्षा मदीया द्रुतं॥

---

*) भगवन् युष्माकं प्रसादेन।

**) आज्ञापयतु भगवान् यद् मया कर्तव्यं दातव्यं च।

***) भगवन् कीदृशी भिक्षा कीदृश्यां वेलायां कियन्ति ते अन्नानि।

॥ सुरतप्रिया ॥ विहस्य स्वगतं

*) हुं एसो महप्पा अप्पविसज्जणजोग्गो ज्जेव देववरस्स पसादेण संपण्णो।

प्रकाशमञ्जलिं बद्धा

**) इदं सरीरं विरहेण जुत्तं।
पाणा तहा धम्मफलेक्कसारा।
सव्वं तुहाअत्तं उदारकित्ति।
का बाहिरे वत्थुणि अत्थि अत्था॥

***) ता अन्तरघरं पविसिअ वीसमीअदु भअवं। अहं उण भिक्खापआरं करोमि।

॥ स्नातकः ॥ सोपहासं

†) भअवं पेक्ख पेक्ख।

संस्कृतमाश्रित्य

पक्वाः कुन्तलराजयः कठकठाक्रान्तौ कपोलावुभौ।
एतस्याः स्तनमण्डलं निपतितं शुष्का नितम्बस्थली।
दृक्पातस्मितभाषितैः शिव शिव प्रस्तौति नेत्रोत्सवं।

---

*) हूं एष महात्मा आत्मविसर्जनयोग्य एव देववरस्य प्रसादेन संपन्नः।

**) इदं शरीरं विरहेण युक्तं। प्राणास्तथा धर्मफलैकसाराः। सर्वं त्वदायत्तमुदारकीर्ते। का बाह्यवस्तुनि अस्ति आस्था॥

***) तस्मादन्तरगृहं प्रविश्य विश्राम्यतां भगवान्। अहं पुनर्भिक्षाप्रकारं करोमि॥

†) भगवन् प्रेक्षस्व प्रेक्षस्व॥

किं ब्रूमः करवाम वेति किमियं दुष्टा जरत्तापसी॥

॥ विश्वनगरः ॥

धिङ् मूर्ख किमसाधुजनोचितं प्रलपसि॥

सुरतप्रियां प्रति।

शुभे गम्यतां पाकशालां प्रति। वयमप्यागच्छन्त एवास्महे॥

॥ सुरतप्रिया ॥

*) जं भअवं आणवेदि॥

इति निष्क्रान्ता॥

॥ स्नातकः ॥

**) भअवं जाव भिक्खा सिज्झदि ताव एत्थ ज्जेव भअवं चिट्ठदु। अहं उण अणङ्गसेणिआए पउत्तिं जाणिअ लहुं आअच्छामि॥

॥ विश्वनगरः ॥

वत्स द्वैरं गम्यतां॥

इत्युभौ परिक्रामतः

॥ स्नातकः ॥

***) भअवं मूलणासअणाविदस्स गेहसंणिहाणे

---

*) यद्भगवानाज्ञापयति।

**) भगवन् यावद्भिक्षा सिध्यति तावदत्रैव भगवान् तिष्ठतु। अहं पुनरनङ्गसेनिकायाः प्रवृत्तिं ज्ञात्वा लघु आगच्छामि॥

***) भगवन् मूलनाशकनापितस्य गेहसंनिधाने अनङ्गसेनाया वासभवनं। इति

अणङ्गसेणाए वासभवणं त्ति मए सुदं। ता तस्स ज्जेव अणुसारेण अण्णेसम्ह ॥

अग्रतोऽवलोक्य

भअवं पेक्ख पेक्ख। एसा अणङ्गसेणा सुरविलासिणी विअ विलोईअदि ॥

॥ विश्वनगरः ॥

तदागच्छाग्रतः। एनामुपसर्पाव ॥

इत्येकान्ते स्थितौ। ततः प्रविशति अनङ्गसेना

॥ स्नातकः ॥ सहसोपसृत्य

*) भअवं पेक्ख पेक्ख अणङ्गसेणाए लावण्णलच्छिं।
णीलम्भोरुहपत्तकन्तणअणा संपुण्णचन्दाणणा।
उत्तुङ्गत्थणभारभङ्गुरतणू वेइव्व मज्झे किसा।
बाला मत्तगइन्दमन्दगमणा सुन्देरसोहामई।
णूणं पञ्चसरस्स मोहणलआ सिङ्गारसंजीवणी ॥

॥ विश्वनगरः ॥ स्वगतं

---

मया श्रुतं। तस्मात् तस्यैवानुसारेणान्वेषामहे॥ भगवन् प्रेक्षस्व प्रेक्षस्व। एषानङ्गसेना सुरविलासिनीव विलोक्यते ॥

*) भगवन् प्रेक्षस्व प्रेक्षस्वानङ्गसेनाया लावण्यलक्ष्मीं। नीलाम्भोरुहपत्रकान्तनयना संपूर्णचन्द्रानना। उत्तुङ्गस्तनभारभङ्गुरतनुर्वेदिरिव मध्ये कृशा। बाला मत्तगजेन्द्रमन्दगमना सौन्दर्यशोभामयी। नूनं पञ्चशरस्य मोहनलता शृङ्गारसंजीवनी ॥

यन्नेत्राञ्जनभङ्गिलङ्गिमभयस्मेराननाम्भोरुहा ।
यत् साकूतकलाविलासवसतिर्यत् कान्तरोमोद्गमा ।
मद्भावेङ्गितसंगतिं तनुलतामालोक्य गोपायति ।
प्रायस्तत् कथयत्यनङ्गरचनामङ्के कृशाङ्गी स्थितां ॥

प्रकाशं

सम्यगुपलक्षितं । तथा हि

यत् तीर्थाम्बु मुखाम्बुजासवरसो नेत्रे नवेन्दीवरे ।
दन्तश्रेणिनखास्तताक्षतचयो दूर्वा च रोमावली ।
उत्तुङ्गं च कुचद्वयं फलयुगं पत्रं कराम्भोरुहं ।
तन्मन्ये मदनार्चनाहितमतिः स्वाङ्गोपहारैरियं ॥

अनङ्गसेनां लक्षीकृत्य

यत् पूर्वं रचितं तपः प्रतिदिनं या तीर्थयात्रा कृता ।
यद्भूम्ना पुरुषोत्तमार्चनविधौ चेतः कृतार्थीकृतं ।
तस्यैतत् परमप्रमोदजनकं प्राप्तं फलं कर्मणाम् ।
तत् किं शास्त्रकथारसेन किमहो स्वर्गेण मोक्षेण वा ॥

इति कामावस्थां नाटयति

॥ स्नातकः ॥ सहर्षवैराग्यं स्वगतं

*) एसो लम्पडो उन्दुरुविवरे सप्पो विअ पइट्ठो ।

---

*) एष लम्पट उन्दुरुविवरे सर्प इव प्रविष्टः । भवतु । युक्तिप्रधानैर्वचनैर्निवारयिष्यामि ॥ भगवन् त्वमुपेक्षितसंसारसौख्यो मोक्षैकपरायणाः कथं एतादृशे मृगतृष्णासदृशे मदनरसे पतित्वा आत्मानं व्यापादयसि । निवर्त्यतां अस्माद् दुष्टगणिकाप्रसङ्गादिति ॥

भोदु। जुत्तिपहाणेहिं वअणेहिं णिवारइस्सं॥

प्रकाशं

भगवं तुमं उपेक्खिदसंसारसोक्खो मोक्खेक्कपराअणो कधं एआरिसे मअतिण्हासरिसे मअणरसे पलिअ अप्पाअणं वावादेसि। णिअत्तीअदु इमादो दुट्ठगणिआपसंगादो त्ति॥

॥ विश्वनगरः॥ सावज्ञं

वत्स नैवं पश्यसि

यावद्दृष्टिर्मृगाक्षीणां न नरीनर्ति भङ्गुरा।
तावज्ज्ञानवतां चित्ते विवेकः कुरुते पदं॥

॥ अनङ्गसेना॥ विहस्य

*) भअवं धणाधीणो क्खु अअं जणो। एत्थ अरणारहिदं कदुअ अप्पाणअं विडम्बेसि॥

॥ विश्वनगरः॥

संन्यासिनामस्माकं कुतोऽर्थसंपत्तिः। तदस्मच्छरीरेण यथासुखं विनियोगः क्रियतां।

सानुरागं

बाले मृणालदलकोमलबाहुदण्डे।

---

*) भगवन् धनाधीनः खलु अयं जनः। अत्र अरण्यरहितं कृत्वात्मानं विडम्बयसि॥

चण्डि प्रचण्डवदने मयि देहि दृष्टिं।
एष त्वदीयवदनाम्बुजकूटचेता।
दीनो यतिः सपदि मज्जति कामसिन्धौ॥

॥ स्नातकः॥

भो भग्रवं तुमं उपेक्खिदसंसारसोक्खो

इत्यादि पठति

॥ अनङ्गसेना॥ संस्कृतमाश्रित्य

भगवन्नलमत्रात्यन्तानुसंधानेन।

वागर्थं परिगृह्य मोक्षपदवीं ध्यायन्ति निर्मत्सराः।
शान्तप्रौढकुलीनदीनविषये सर्वत्र साधारणाः।
रागद्वेषममत्वकर्पितधियो वेश्याः सुरा भिक्षवो।
वस्तुं नन्वपि नित्यनित्यदक्ष किं कामार्णवे मज्जसि॥

॥ विश्वनगरः॥

प्रिये गृहाणास्मच्छरीरं॥

इत्यञ्चले धारयति

॥ स्नातकः॥ सकोपमाश्रित्य

*) अरे णट्टपरलोआ दुट्ठपरिव्वाअआ एसा पठमं अम्हपरिग्गहेण तुह पुत्तवहू होदि। ता मुञ्च एणं।

---

*) अरे नटपरलोक दुष्टपरिव्राजक एषा प्रथमकलत्रपरिग्रहेण तव पुत्रवधूर्भवति। तस्मान् मुञ्चैनां॥

॥ विश्वनगरः ॥

धिङ् मूर्ख एषास्मद्वधूस्त्वद्गुरुपत्नी मातृतुल्या च। तत् किमेनामनुबध्नासि ॥

॥ स्नातकः ॥ सक्रोधं

*)अरे रे लम्पडा एवं एवं भणन्तस्स दण्डप्पहारेण पक्कमालूरफलं विअ मुण्डं दे खण्डं करइस्सं ॥

इत्यन्योन्यं कलहं कुरुतः

॥ अनङ्गसेना ॥ स्वगतं

**)कधं धुत्तहत्थपलिदम्हि। भोदु एवं ताव ॥

प्रकाशं

भो महाभाअधेआ तुम्हाणं एआरिसे महाविवादे असङ्गाइमिस्सो पमाणीकरीअदु ॥

॥ विश्वनगरः ॥

प्रिये भवतु ॥

॥ स्नातकः ॥

***) पिए दसटङ्का मए दादव्वा। ता तं गेण्हिअ मह मणोहरं संपादेहि ॥

---

*) अरे रे लम्पट एवं एवं भणतो दण्डप्रहारेण पक्वमालूरफलमिव मुण्डं तव खण्डशः करिष्यामि ॥

**) कथं धूर्तहस्तपतितास्मि। भवतु एवं तावत्। भो महाभागधेया युष्माकमेतादृशे महाविवादे असज्जातिमिश्रः प्रमाणीक्रियतां ॥

***) प्रिये दशटङ्का मया दातव्याः। तत्मात् तद् गृहीत्वा मम मनोहरं संपादय ॥

इति ग्रन्थिं दर्शयति

॥ विश्वनगरः ॥

अलं ग्रन्थिदर्शनेन। आगच्छतं। तत्रैव गच्छामः ॥

इति निष्क्रान्ताः सर्वे॥

इति प्रथमाङ्कःसंधिः ॥

---

ततः प्रविशति असज्जातिमिश्रो विदूषकश्च

॥ असज्जातिमिश्रः ॥

सप्रमोदनं

त्रैलोक्यभोजनं श्रेष्ठं ततोऽपि सुरतोत्सवः।
भोजनं वास्तु वा नास्तु जीवनं सुरतं विना ॥

वत्स वन्धुवञ्चक आगच्छाधीष ॥

॥ विदूषकः ॥

*)जं मिस्सो आणवेदि ॥

॥ असज्जातिमिश्रः ॥

यद्वामावक्त्रपानं यदलसनयनालोकनं केलिरङ्गे।
यः स्यादप्यङ्गसंगः कुचकलससमुत्पीडने वाङ्गभङ्गिः।

---

*) यद् मिश्र आज्ञापयति।

एतत् संसारसारं कुरु निजहृदये निर्विकल्पैककल्पं।
किं ते कार्यं विवादक्वथितश्रुतिमतिग्रन्थकन्थाभरेण॥

॥ विदूषकः ॥

*) भो मिस्स पराङ्गणासंभोगादो पि परमन्दिरे संधिं कदुअ जं अत्थो अवहरीअदि तं ज्जेव तिहुअणसारं।
पेक्ख पेक्ख
किं वाणिज्जेण कज्जं णिअधणविलग्गं तं क्खु काऊण दुक्खं।
किंवा कज्जं किसीए पसुवसुणिअमाआसणिक्कज्जदाए।
किं विज्जाए फलं वा मरणसमसमुप्पणचिन्ताउलाए।
एक्कं तेल्लोअसारं परधणहरणं जूअकीलासुहं च॥
ता एत्थ धुत्तणअरे जादिसो तुमं गुरू तादिसो अहं सिस्सो संवुत्तो॥

॥ असज्जातिमिश्रः ॥

अहो अस्मिन् नगरे निरुपधिजीवनतास्माद्विधश्रो-

---

*) भो मिश्र पराङ्गनासंभोगादपि परमन्दिरे संधिं कृत्वा यदर्थोऽपह्रियते तदेव त्रिभुवनसारं। प्रेक्षस्व प्रेक्षस्व। किं वाणिज्येन कार्यं निजधनविलग्नं तं खलु कृत्वा दुःखं। किं वा कार्यं कृष्या पशुवसुनियमायासनिष्कार्यतया। किं विद्यायाः फलं वा मरणसमसमुत्पन्नचिन्ताकुलायाः। एकं त्रैलोक्यसारं परधनहरणं द्यूतक्रीडासुखं च॥ तदत्र धूर्तपुरनगरे यादृशस्त्वं गुरुस्तादृशोऽहं शिष्यः संवृत्तः॥

त्रियाणां। दिनादेतस्मादारभ्य न कश्चिन्न्यायवादी न कपटश्राद्धप्रतिलम्भो न च गणिकालापः॥

॥ नेपथ्ये ॥

विज्ञाप्यतां मिश्रस्य स्थाने न्यायकरणार्थं वादिनौ द्वारि वर्तेते॥

॥ असज्जातिमिश्रः॥

वत्स बन्धुवञ्चक प्रवेशय वादिनौ।

विदूषको निष्क्रम्य विश्वनगरस्नातकाङ्गसेनाभिः सह पुनः प्रविशति।

॥ असज्जातिमिश्रः॥ विश्वनगरस्नातकौ निरीक्ष्य स्वगतं

कथमनर्थान्तरमापतितं॥

प्रकाशं

भगवन्नागन्तुका वयं। तन्नात्र भिक्षावसरः।

॥ विदूषकः॥

*) भो मिस्स एदे ज्जेव वादिणो। एदाणं विवादं विचारेदु मिस्सो॥

॥ असज्जातिमिश्रः॥ सहर्षं सगौरवं च

आसनमुपनीयतां भगवते स्नातकाय च॥

विदूषकस्तथा कृत्वा सर्वान् उपवेशयति

॥ असज्जातिमिश्रः॥

कोऽर्थी कः प्रत्यर्थी॥

---

*) भो मिश्र एतावेव वादिनौ। एतयोर्विवादं विचारयतु मिश्र.॥

॥ स्नातकः ॥

*) भासाए अहं अत्थी णिअरकरणे भअवं ॥

॥ असज्जातिमिश्रः ॥

न्यायवादिनः प्रथमतो निकरः पश्चाद्भाषोत्तरे ॥

॥ विश्वनगरः ॥

अयमस्मत्संन्यासदण्डो निकरः ॥

॥ स्नातकः ॥

**) एदं मे इन्दासणकोलिअं णिअरकरणे पविणीअदु ॥

॥ असज्जातिमिश्रः ॥ सगौरवं गृहीत्वा सप्रमोदमाघ्राय

किंचिद्विनियुज्यते निद्राकरं दोषविनाशहेतु ।
क्षुधाकरं बुद्धिविकाशकं च ।
इन्द्राशनं कामबलानुकूलं ।
लब्धं मया दैववशादिदानीं ॥

॥ विश्वनगरः ॥

स्वाधीनयौवना सुभ्रूः सा मान्या सर्वकामिनां ।
अस्माभिरियनाक्रान्ता मदीया तेन वल्लभा ॥

॥ असज्जातिमिश्रः ॥ भार्यां भूमौ लिखित्वा स्नातकं प्रति

स्नातक सत्वरमुत्तरं कुरु ॥

---

*) भाषायामहमर्थी निकरकरणे भगवान् ।

**) इदं मे इन्द्राशनकौलिकं निकरकरणे प्रविनीयतां ।

॥ स्नातकः ॥

*) एसा पुव्वं मए दिट्ठा दाऊण दसटङ्कआ ।
आणीदा अ मदिं दाइं मदीआ तेन वल्लहा ॥

॥ असज्जातिमिश्रः ॥

उत्तरमभिलिख ॥

॥ विदूषकः ॥

**) भो मिस्स पेक्ख पेक्ख अणङ्गसेणाए लावण्णलच्छिं ।
मअलञ्छणविम्बफुरन्तमुही ।
णअणुप्पलचञ्चलकेलिणिही ।
थणभारणआ अइमज्झकिसा ।
पढमोदिअचन्दकलासरिसा ॥

॥ असज्जातिमिश्रः ॥ अनङ्गसेनामालोक्य

अहो निर्माणवैदग्धी विधातुः । तथा हि
नीलोल्लसच्चलितखञ्जनमञ्जुनेत्रा ।
संपूर्णशारदकलानिधिकान्तवक्त्रा ।
वाला जगत्त्रितयमोहनदिव्यमूर्तिर्- ।

---

*) एषा पूर्वं मया दृष्टा दत्वा दशटङ्ककान् । आनीता च मतिं दयितां मदीया तेन वल्लभा ॥

**) भो मिश्र प्रेक्षस्व प्रेक्षस्वानङ्गसेनाया लावण्यलक्ष्मीं ।
मृगलाञ्छनबिम्बस्फुरन्मुखी । नयनोत्पलचञ्चलकेलिनिधिः ।
स्तनभारनतातिमध्यकृशा । प्रथमोदितचन्द्रकलासदृशा ॥

मन्ये विभाति जगति स्मरधीरकीर्तिः ॥

भो वादिनौ एषा विवादाध्यासितानङ्गसेना जयपराजयं यावत् मध्यस्थस्थाने स्थाप्यतां। एवंविधे च माध्यस्थ्ये वयमेव नृपतिव्यवस्थिता मध्यस्थाः।

अनङ्गसेनामानीय स्वसंनिधावुपवेश्य तदीयकरं हृदये निधाय सप्रमोदं

विकचकमलकोषश्रीरियं काम्यभूतिर्-।
हिमकरकरजाताच्चन्द्रकान्ताद्धि शीतः।
मृगमदघनसारासंगसौरभ्यभव्यो।
हरति मदनतापं कोमलः पाणिरस्याः ॥

क्षणं विचार्य उच्चैर्विहस्य

भो वादिनौ एतद्राज्यदेवेभुजङ्गयोरिव युवयोर्विवादः॥ तथा हि

नैषा त्वदीया भवतोऽपि नेयं।
मत्संनिधिष्ठा सुभगा मदीया।
स्वप्नेऽपि पूर्वं मयि जातकेलिस्-।
ततोऽपि हेतोः खलु वल्लभा मे ॥

॥ विदूषकः ॥ अनङ्गसेनामालोक्य जनान्तिकं

*) भो सुन्दरि एसो मिस्सो वुड्ढो भअवं णिद्धणो

---

*) भो सुन्दरि एष मिश्रो वृद्धो भगवान् निर्धनः स्नातक इक्षारचनः।

सिणादओ इट्ठारअणो। ता एदाणं समागमं परिहरिअ अम्हसमागमेण तुह जोव्वणं सफलं भोदु ॥

इत्यात्मानं दर्शयति

॥ अनङ्गसेना ॥ सस्मितं

*) एदं धुत्तसमागमपहसणं संवुत्तं ॥

॥ विश्वनगरः ॥ सवैराग्यं

वत्स दुराचार न हि जलौकसामङ्गे जलौका लगति। मूलनाशकस्यायं विचारः। तदेहि सुरतप्रियाया एव भवनं गच्छाव ॥

इति निष्क्रान्तौ। ततः प्रविशति अपटीक्षेपेण मूलनाशकः

॥ मूलनाशकः ॥

**) अले अले अणङ्गशेणिए जाणिदे तुम्ह चलिदं जं वालं वालं कअमअणमन्दिलकचौलवेदणं पत्थन्ते वडुवालं हग्गे तए पआशिदे। ता शंपदं पअच्छ। अण्णधा लाअदोह्लाइं दाव दाइश्शं ॥

---

तस्मादेतेषां समागमं परिहृत्य अस्मत्समागमेन तव यौवनं सफलं भवतु ॥

*) एतत् धूर्तसमागमप्रहसनं संवृत्तं ॥

**) अरे अरे अनङ्गसेनिके ज्ञातं तव चरितं यद् वारं वारं कृतमदनमन्दिरचौरवेतनं प्रार्थयन् बहुवारमहं त्वया प्रकाशितः ॥ तस्मात् सांप्रतं प्रयच्छ। अन्यथा राजाह्वानानि तव दास्यामि ॥

॥ अनङ्गसेना ॥

*) मूलनासअ संपदं ज्जेव असज्जाइमिस्सादो तुह दाइस्सं। ता सुत्थो होहि ॥

॥ विदूषकः ॥

**) को एसो दुट्ठदंसणो दुट्ठचरिदो दुट्ठवअणो ॥

॥ असज्जातिमिश्रः ॥

एष किं भगवदगोचरः। पश्य
छिन्नौठनासो गलगण्डनम्रो।
वामाक्षिकाणो गलितैकहस्तः।
शिलीपदव्यापृतदक्षिणाङ्घ्रिः।
स मूलनाशः किल नापितोऽसौ ॥

मूलनाशकः सहसोपसृत्य सर्वेषां सप्रमाणमादर्शं दर्शयति

॥ असज्जातिमिश्रः ॥

मूलनाशक क्रियतामस्माकं नखलोम्नां परिष्कारः॥

॥ मूलनाशकः ॥

***) पठमं वेदनं पअच्छ ॥

---

*) मूलनाशक सांप्रतमेव असज्जातिमिश्रात् तव दास्यामि। तस्मात् सुस्थो भव ॥

**) क एष दुष्टदर्शनो दुष्टचरितो दुष्टवचनः ॥

***) प्रथमं वेतनं प्रयच्छ।

॥ असज्जातिमिश्रः ॥

मूलनाशक किमर्थं ॥

॥ मूलनाशकः ॥

*)भो जदि तुमं पलिक्खलन्ते पठमं ज्जेव मलिश्शशि ता वेदनं किण पदाहिदव्वं ॥

॥ असज्जातिमिश्रः ॥

अलं परिहासेन। गृह्यतामिदं पारितोषिकं ॥

इति कौलिकादाकृष्य गञ्जाकिनीं ददाति। मूलनाशकः सगौरवं गृहीत्वा सप्रमोदं आघ्राय किंचिद्विनियुज्य च मिश्रस्य करचरणयोर्बन्धनं कृत्वा व्यापारं नाटयति

॥ असज्जातिमिश्रः ॥ सवेदनं

दलति हृदयमेतन्मोहमभ्येति चेतः।
स्फुटति सकलदेहे कीकसग्रन्थिसंधिः।
विरम विरम शिल्पान्मूलनाश त्वमस्मात्।
शिव शिव शिव सद्यो जीवनं कुप्यतीव ॥

इति मोहमुपागतः

॥ मूलनाशकः ॥ चालयित्वा

**)कधं मलिदे अशज्जादिमिश्शे लहु लहु अवक्कमिश्शं ॥

इति निष्क्रान्तः

---

*) भो यदि त्वं परिस्खलन् प्रथमं मरिष्यसि तदा वेतनं केन प्रदातव्यं ॥

**) कथं मृतोऽसज्जातिमिश्रः। लघु लघु अपक्रमिष्यामि।

॥ विदूषकः ॥ मिश्रस्य करचरणयोर्बन्धनमपनीय

*)भोआणवेदु मिस्सो अवरं क्खु तुह पिअं णिव्वाहइस्सं ॥

॥ असज्जातिमिश्रः ॥ संज्ञां लब्ध्वा

राष्ट्रं समस्तं कपटेन भुक्तं ।
धूर्तक्रियाभिर्दयितेयमाप्ता ।
भवान् विनीतो मिलितश्च शिष्यः ।
नातः परं नः प्रियमस्ति लोके ॥

तथापीदमस्तु ।

काले संततवर्षिणो जलमुचः शस्यैः समृद्धा धरा ।
भूपाला निजधर्मपालनपरा विप्रास्त्रयीनिर्भराः ।
स्वादुक्षीरनतोधसः प्रतिदिनं गावो निरस्तापदः ।
सन्तः शान्तिपरा भवन्तु कृतिनः सौजन्यभाजो जनाः ॥

इति निष्क्रान्ताः सर्वे ॥

इति श्रीकविशेखराचार्यज्योतिरीश्वरविरचितं धूर्तसमागमं नाम प्रहसनं समाप्तं ॥

---

*) भो आज्ञापयतु मिश्रः । अपरं खलु तव प्रियं निर्वाहयिष्यामि ॥

# HYMNI E RIGVÊDA.

## BHARADVÂG'AE HYMNUS IN AURORAM.

उदु श्रिय उषसो रोचमाना अस्थुरपां नोर्मयो रुशन्तः ।
कृणोति विश्वा सुपथा सुगान्यभूदु वस्वी दक्षिणा
मघोनी ॥
भद्रा ददृक्ष उर्विया विभास्युत् ते शोचिर्भानवो
द्यामपप्तन् ।
आविर्वक्षः कृणुषे शुम्भमानोषो देवि रोचमाना
महोभिः ॥
वहन्ति सीमरुणासो रुशन्तो गावः सुभगामुर्विया
प्रथानां ।
अपेजते शूर अस्तेव शत्रून् बाधते तमो अजिरो न
वोल्हाः ॥
सुगोत ते सुपथा पर्वतेष्ववाते अपस् तरसि स्वभानो ।
सा न आवह पृथुयामन्नृष्वे रयिं दिवो दुहितरि-
षयध्यै ॥

सावहयोक्षभिरश्वातोषो वरं वहसि जोषमनु ।
त्वं दिवो दुहितर्या ह देवी पूर्वहूतौ मंहना दर्शताभूः ॥
उत् ते वयश्चिद्वसतेरपप्तन् नरश्च ये पितुभाजो व्युष्टौ ।
अमा सते वहसि भूरि वाममुषो देवि दाशुषे मर्त्याय ॥

---

## ÂTRÊYAE HYMNUS IN AGNIM.

त्वामग्ने हविष्मन्तो देवं मर्तास ईलते ।
मन्ये त्वा जातवेदसं स हव्या वक्ष्यानुषक् ॥
अग्निर्होता दास्वतः क्षयस्य वृक्तवर्हिषः ।
सं यज्ञासश्चरन्ति यं सं वाजासः श्रवस्यवः ॥
उत स्म यं शिशुं यथा नवं जनिष्टारणी ।
धर्तारं मानुषीणां विशामग्निं स्वध्वरं ॥
उत स्म दुर्गृभीयसे पुत्रो न ह्वार्याणां ।
पुरू यो दग्धासि वनाग्ने पशुर्न यवसे ॥
अध स्म यस्यार्चयः सम्यक् संयन्ति धूमिनः ।
यदीमह त्रितो दिव्युप ध्मातेव धमति शिशीते ध्मातरी यथा ॥
तवाहमग्न ऊतिभिर्मित्रस्य च प्रशस्तिभिः ।

द्वेषोयुतो न दुरिता तुर्यां मर्त्यानां ॥
तं नो अग्ने अभी नरो रयिं सहस्व आभर ।
स क्षेपयत् स पोषयद्भुवद्वाजस्य सातय उतैधि पृत्सु
नो वृधे ॥

---

## VIÇVÂMITRAE HYMNUS IN SOLEM.

इयं ते पूषन्नघृणे सुष्टुतिर्देव नव्यसी ।
अस्माभिस्तुभ्यं शस्यते ॥
तां जुषस्व गिरं मम वाजयन्तीमवा धियं ।
वधूयुरिव योषणां ॥
यो विश्वाभिविपश्यति भुवना सं च पश्यति ।
स नः पूषा विता भुवत् ॥

---

तत् सवितुर्वरेण्यं भर्गो देवस्य धीमहि ।
धियो यो नः प्रचोदयात् ॥
देवस्य सवितुर्वयं वाजयन्तः पुरन्ध्या ।
भगस्य रातिमीमहे ॥
देवं नरः सवितारं विप्रा यज्ञैः सुवृक्तिभिः ।
नमस्यन्ति धियेषिताः ॥

---

## VASISTHAE HYMNUS IN AGNIM.

उपसद्याय मील्हुषे आस्ये जुहुता हविः ।
यो नो नेदिष्ठमाप्यं ॥
यः पञ्चचर्षणीरभिनिषसाद् दमे दमे ।
कविर्गृहपतिर्युवा ॥
स नो वेदो अमात्यमग्नी रक्षतु विश्वतः ।
उतास्मान् पात्वंहसः ॥
नवं नु स्तोममग्नये दिवः श्येनाय जीजनं ।
वस्वः कुविद्वनाति नः ॥
स्पार्हा यस्य श्रियो दृशे रयि वीरवतो यथा ।
अग्ने यज्ञस्य शोचतः ॥
सेमं वेतु वषट्कृतिमग्निर्जुषत नो गिरः ।
यजिष्ठो हव्यवाहनः ॥
नि त्वा नक्ष्य विश्पते द्युमन्तं देव धीमहि ।
सुवीरमग्न आहुत ॥
क्षप उस्रश्च दीदिहि स्वग्नयस्त्वया वयं ।
सुवीरस्त्वमस्मयुः ॥
उप त्वा सातये नरो विप्रासो यन्ति धीतिभिः ।
उपाक्षरा सहस्रिणी ॥

अग्नी रक्षांसि सेधति शुक्रशोचिरमर्त्यः ।
शुचिः पावक ईड्यः ॥

---

## VASISTHAE HYMNUS IN AGNIM.

एना वो अग्निं नमसोर्जो नपातमाहुवे ।
प्रियं चेतिष्ठमरतिं स्वध्वरं विश्वस्य दूतममृतं ॥
स योजते अरुषा विश्वभोजसाः स दुद्रवत् स्वाहुतः ।
सुब्रह्मा यज्ञः सुशर्मा वसूनां देवं राधो जनानां ॥
उदस्य शोचिरस्थादाजुह्वानस्य मील्हुषः ।
उद्धूमासो अरुषासो दिविस्पृशः समग्निमिन्धते नरः ॥
तं त्वा दूतं कृण्महे यशस्तमं देवाना वीतये वह ।
विश्वा सूनो सहसो मर्तभोजना रास्व तद्यत् त्वेमहे ॥
त्वमग्ने गृहपतिस्त्वं होता नो अध्वरे ।
त्वं पोता विश्ववार प्रचेता यक्षि वेषि च वार्यं ॥
कृधि रत्नं यजमानाय सुक्रतो त्वं हि रत्नधा असि ।
आ न ऋते शिशीहि विश्वमृत्विजं सुशंसो यश्च दक्षते ॥

---

## VASIST'HAE HYMNUS IN DEUM PLUVIUM.

पर्जन्याय प्रगायत दिवस्पुत्राय मील्हुषे ।
स नो यवसमिच्छतु ॥
यो गर्भमोषधीनां गवां कृणोत्यर्वतां ।
पर्जन्यः पुरुषीणां ॥
तस्मा इदास्ये हविर्जुहोता मधुमत्तमं ।
इलां नः संयतं करत् ॥

---

## AD AGNIM.

समिधा जातवेदसे देवाय देवहूतिभिः ।
हविर्भिः शुक्रशोचिषे नमस्विनो वयं दाशेमाग्नये ॥
वयं ते अग्ने समिधा विधेम वयं दाशेम सुष्टुती यजत्र ।
वयं घृतेनाध्वरस्य होतर्वयं देव हविषा भद्रशोचे ॥
आ नो देवेभिरुप देवहूतिमग्ने याहि वषट्कृतिं जुषाणः ।
तुभ्यं देवाय दाशत स्याम यूयं पात स्वस्तिभिः सदा नः ॥

# CONSPECTUS METRORUM.

I. *Çlôcus epicus, Anustub'* proprio nomine dictus. Distichon est, cuius versus uterque sibi par caesura in duo dividitur hemistichia dissimilia; primum totius çlôci hemistichium par est tertio, secundum quarto. Quodque hemistichium octonas continet syllabas, quarum quaternae priores magnam admittunt pedis variationem, quaternae posteriores in hemm. 1mo et 3tio plerumque hanc formam praebent: ⏑ — — ⏒, rarius hancce: — ⏑ ⏑ ⏓, longe rarius alias; in hemm. 2do et 4to quaternae syllabae posteriores semper hunc sequuntur numerum: ⏑ — ⏑ ⏓. Schema itaque vulgatissimum hoc est:

. . . . | ⏑ — — ⏒ | . . . . | ⏑ — ⏑ ⏓ |
. . . . | ⏑ — — ⏒ | . . . . | ⏑ — ⏑ ⏓ ||

Accuratior expositio ab hoc loco aliena est. Pertinet çlôcus epicus ad antiquissima versuum genera, qui ad severiores leges nondum revocati fuerant.

II. *Monoschematica* metra sunt ea, quorum singulis versibus iidem pedes eodem ordine sine ulla variatione revertuntur. Disticha etiam haec sunt, in binos versus divisa; singuli versus binis constant hemistichiis, quae plerumque inter se paria sunt; quod quum fiat (et fit semper in metris huius libelli monoschema-

ticis) oritur tetrastichon e quatuor partibus prorsus paribus conflatum. Sufficit itaque formas hemistichiorum exhibere.

*a*) Metrum, cui nomen *Indravag'ra;* schema hoc: ⏓—⏑— —⏑⏑— ⏑—⏓ |

Cf. p. 27, 1-2; p. 31, 13-16; p. 78, 8-11; p. 80, 5-8; p. 90, 10-13; p. 92, 13-16; p. 94, 8-11; p. 96, 4-7.

*b*) *Vançast'a,* cuius hemistichium: ⏓—⏑— —⏑⏑— ⏑—⏑⏓ |

Cf. p. 7, 17-20; tum Rit. San. distt. 1-21.

*c*) *Tôt'aka,* cuius schema: ⏑⏑— ⏑⏑— ⏑⏑— ⏑⏑—|

Cf. p. 91, 8-11.

*d*) *Vasantatilaka,* huius schematis: —— ⏑— ⏑⏑⏑— ⏑⏑— ⏑—— |

Cf. p. 1, 3-6; p. 25, 9-11; 19-20 et p. 26, 1-2; p. 44, 10-13; p. 67, 20 et p. 68, 1-3; p. 70, 9-12; p. 74, 16-17 et p. 75, 1-2; p. 84, 18 et p. 85, 1-3; p. 91, 14-18 et p. 92, 1.

*e*) *Mâlinî,* cuius hemistichium: ⏑⏑⏑⏑⏑⏑—— || —⏑——⏑—— |

P. 24, 14-17; p. 64, Rit. San. distt. 22 seqq.; p. 69, 7-10; p. 71, 3-6; p. 92, 6-9; p. 95, 12-15.

*f*) *Çik'arin'î:* ⏑————— || ⏑⏑⏑⏑⏑— —⏑⏑⏑— |
Per signum || indicavi hypotmesin cuiusque versus. cf. p. 6, 14-17.

*g*) *Mandakrânta:* ———— || ⏑⏑⏑⏑⏑— || —⏑——⏑—— |

Cf. p. 29, 18-20 et p. 30, 1.

*h*) *Çârdûlavikrîd'ita:* ———⏑⏑—⏑—⏑⏑⏑— || ——⏑ ——⏑— |

Cf. p. 11, 12-15; p. 15, 9-12; p. 20, 20 et p. 21, 1-3; p. 35, 14-17; 19-20 et p. 36, 1-2; p. 66, 8-11; 14-17; p. 67, 1-4; 15-18; p. 68, 12-15; p. 73, 13-16; p. 74, 1-4; p. 76, 4-7; p. 77, 2-5; p. 79, 14-17; p. 80, 14-17 et p. 81, 1; p. 82, 11-14; p. 83, 1-4; 7-10; 12-15; p. 85, 9-12; p. 96, 9-12.

*i*) *Sragdara*: — — — — ◡ — — ‖ ◡ ◡ ◡ ◡ ◡ ◡ — ‖ — ◡ — — ◡ — — |

Cf. p. 66, 3-6; p. 71, 10-13; 15-16 et p. 72, 1-2; 10-13; p. 87. 15-16 et p. 88, 1-2; 7-11.

III. *Metra polyschematica.* Versus sunt, quorum pedes non numero, sed pondere syllabarum scanduntur. Cuique pedi pondus esse solet quaternarum morarum sive syllabarum brevium; id genus pedum omnes praebent polyschematici versus per hunc libellum. Praevalent tales versus in carminibus Prâcriticis, quamvis nonnulla huiusmodi metra etiam in Sanscriticam linguam adscita sunt, sicuti altera ex parte metra monoschemàtica aevo seriori ad versus Prâcriticos accommodantur; originitus monoschematici versus recitationi (पाठ्य), polyschematici canticis proprii fuisse videntur. Pedes quaternarum morarum hunc in modum variari possunt: ◡◡◡◡, —◡◡, ◡◡—, — —, ◡—◡. Quae pedum variationes pro metrorum diversitate aut ad certas quasdam versus cuiusvis sedes restringuntur aut ubique locum habere possunt. Etiam numerus pedum in singulis versibus magnopere variatur et praeter disticha quaternario versuum numero constantia, quae praevalet in poesi Sanscritica strophae forma, alia in-

veniuntur, ex diverso versuum numero conflata; quo fit, ut maxima oriatur tum versuum, tum distichorum varietas.

Hisce praemissis exhibebo ea huius generis metra, quae in nostro libello exstant:

*a*) Vulgatissimum metrum est Ârjâ, cuius tamen duo tantum exempla leguntur p. 31, 17-20. ad hancce mensuram redigenda:

⏑⏑⏑⏑              – –
⏑⏑– | –⏑⏑ | ⏑–⏑ || ⏑⏑⏑⏑ | – – | ⏑–⏑ | – – | ⏑ |
–⏑⏑     –⏑⏑              ⏑–⏑              –⏑⏑
⏑⏑⏑⏑ | ⏑–⏑ | – – || – ⏑ ⏑ | – – | ⏑ | – – | ⏑ ||

Sunt disticha hemistt. quaternum; hemm. 1. et 3. tribus consistunt pedibus, hemm. 2 et 4. quinis acatalecticis; hem. 2. in sede tertia amphibrachyn praebere solet, admittit etiam proceleusmaticum, non alios pedes; hem. 4. pes tertius una syllaba efficitur. Ceteri pedes haud paucas patiuntur variationes, quas h. l. enumerare non attinet.

*b*) Distichon p. 70, 1-4. huius mensurae:

– ⏑ ⏑ | – ⏑ ⏑ | – ⏑ ⏑ | – ⏓ || ⏑⏑⏑⏑ | ⏑⏑⏑⏑ | – ⏑ ⏑ | – ⏓ |
⏑⏑⏑⏑ | – ⏑ ⏑ | – ⏑ ⏑ | – ⏓ || ⏑ ⏑ – | – ⏑ ⏑ | – ⏑ ⏑ | – ⏓ ||

Continet itaque hemistichium quodvis quatuor pedes catalecticos, in quibus praevalet forma dactylica.

*c*) P. 69, 12-17. Stropha est versuum octo, quorum quatuor priores quaternis anapaestis consistunt, quatuor posteriores ad Arjae mensuram quadrant. Schema hoc est:

⏑⏑– | ⏑⏑– | ⏑⏑– | ⏑⏑– || ⏑⏑– | ⏑⏑– | ⏑⏑– | ⏑⏑– |
⏑⏑– | ⏑⏑– | ⏑⏑– | ⏑⏑– || ⏑⏑– | ⏑⏑– | ⏑⏑– | ⏑⏑– |
– – | ⏑–⏑ | – – || ⏑⏑⏑⏑ | – – | ⏑–⏑ | ⏑⏑– | ⏑ |
– – | ⏑⏑⏑⏑ | – – || ⏑–⏑ | –⏑⏑ | ⏑ | –⏑⏑ | ⏑ ||

Quum alia absint exempla, de variationibus huius metri nil definire possum.

IV. Res metrica Vedarum satis adhuc est obscura; libri indigenarum doctorum metrici nondum editi sunt, et pauca tantum de Vedico versuum genere disputavit Colebrookius. Specimina si quaeris, quorum ope ipse doctrinam informare possis, praeter ea quae in hoc libello repetenda curavi, nulla in promptu sunt; omnia itaque quae equidem sciam, ex paucis hisce exemplis hausi, paucioribus eis, quam quibus opus fuisset ad certam doctrinam stabiliendam. Accedit alia et nova quaedam difficultas. Facile enim accidere potuit, ut scriptura antiquissimorum horum carminum ad leges serioris grammaticae vulgatas saepius revocata fuerit, quo facto non perturbari non potuit ratio eorum metrica; scripturam itaque si sequeris vulgatam, facile de numeris falso poteris iudicare; et si emendare vis scripturam, opus est ipsa illa quae quaeritur cognitione versuum.

